2341

[illegible]

[illegible]

[illegible]

सर्वदर्शन-विमर्शः

(सहस्राधिककारिकानिबद्धः समन्वयेन संक्षेपतः सर्वदर्शनसिद्धान्त-
समालोचनविमर्शात्मको ग्रन्थः)

रचयिता

शिवजी उपाध्यायः

प्राध्यापकः साहित्यविभागे,

वाराणसेय-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्रकाशकः—
शिवजी उपाध्यायः
सम्पूर्णानन्द संस्कृत विश्वविद्यालय-
वाराणसीस्थः

मूल्यम्—

मुद्रकः—
सम्पूर्णानन्द संस्कृत विश्वविद्यालय मुद्रणालय-

प्रकाशनतिथिः
विजयादशमी
वि० सं० २०३८

अनुक्रमांणका

सं० सं० विश्वविद्यालयस्य साहित्यविभागाध्यक्षचराणां पद्मभूषण विद्यासागर पं० श्रीपट्टाभिरामशास्त्रिमहानुभावानां शुभाशंसनम्—

हिमेन्दुकुन्दकुमुदप्रस्पर्धिसत्कीर्तयः प्राञ्चः सुमतयो महर्षयः तीक्ष्णं तपस्तेपाना विना किमपि विद्यास्थानं देशस्य गौरवं समेधितं न स्यादिति सुविचिन्त्य चतुरो वेदान् तेषामर्थतश्शब्दतश्च रक्षणाय षडङ्गानि पुराणादीनि च चत्वारि साधनान्याविष्कृत्याद्यापि यशश्शरीरा विराजन्त इति प्रत्यक्षं नस्समेषाम्। अद्योपलभ्यमाने निखिलेऽपि वाङ्मये परिशील्यमाने स्फुटं प्रतिभायात् यत्ते पुण्यश्लोकाः कस्मै प्रयोजनाय पवित्रेऽस्मिन् कार्ये प्रावर्तिषतेति। यथा हि प्रयोगविधिर्नियतं कञ्चन क्रममवबोधयन् कर्मानुष्ठानप्रयोजकः परिगण्यते तथैव विधिरूपः परमेश्वरः कञ्चन नियतं क्रमिकञ्च कालमस्त्राक्षीत्। तञ्चावलम्ब्य सूत्राणि, वृत्तयो, भाष्याणि, तद्व्याख्यास्तदनुव्याख्याः स्वतन्त्राश्च प्रकरणग्रन्था इत्येवं कालक्रमेण संस्कृतवाङ्मयस्य गात्रं चिरन्तना अपोषिषत। तैर्विरचितेषु ग्रन्थरत्नेष्वधीयमानेषु तत्तन्निर्मातॄणां कियान् स्पर्धातिशय इति स्पष्टमवबोद्धुं शक्यम। कामं विरुद्धमार्गप्रदर्शकाश्चिरन्तनानामिमे ग्रन्था भवेयुः, परं विरुद्धभावनाहितचेतसो लोका मिथः कलहव्यापारे प्रवर्तन्तामित्याशयेन प्राचामत्र प्रवृत्तिरिति न खलु निश्चेतुं शक्यम्। प्रत्युत गभीरचिन्तनाशक्तेर्विकासायैवायमुद्यमः प्राचामिति।

'कारणगुणाः कार्यगुणानारभन्त' इति हि न्यायः। किमिदं जगत्? कस्मादिदं प्रावर्तिष्ट? इति निश्चलमनसो जगत्तत्त्वागमाय सुचिरं चिन्तयन्तः प्राक्तना महर्षयः स्वप्रणीतग्रन्थद्वारा पृथक् पृथक् किमपि विशिष्टं तत्त्वमाविश्चक्रुः। तत्र समीक्षकाणां विवेकेन तत्तन्मतं परिशील्य समन्वयदृष्टिमाश्रित्य वैपरीत्यपरिहारे विरोधप्रशमने च यत्नस्समुचितः।

अधुना त्वाणविके युगे सर्वमपि वेगेन साधयितुमभिलषति मानवः। इमां प्रवृत्तिं विलोक्यैव 'दर्शनोदयः' 'दर्शनसोपानम्', 'सर्वदर्शनसंग्रहः', 'तन्त्रसिद्धान्तरत्नावलिः' इत्यादयोऽनेके ग्रन्था विद्वद्भिः प्रणीता विलोक्यन्ते। इममेव पन्थानमवलम्ब्य साहित्याचार्यः पं० श्रीशिवजी उपाध्यायो ललितललितैः सरससरसैश्च पद्यैः 'सर्वदर्शनविमर्शः' इत्याख्यमतिसरलं विपुलञ्च कारिकामयं ग्रन्थं प्रणीय दार्शनिकसिद्धान्तेषु झटिति प्रविविक्षूणां महान्तमुपकारमकार्षीदिति नितरां प्रसीदामि।

श्रीमानुपाध्यायोऽलङ्कारशास्त्रे काव्यशास्त्रे च वैदग्ध्यमाबिभ्राणः सं० सं० विश्वविद्यालये विनेयानध्यापयन् कविताकलायां च स्पृहणीयां शक्तिमादधान एतादृशेषु दार्शनिकग्रन्थरचनाकार्येषु प्रवृत्तिमानस्तीति परमां मुदमावहामि। ग्रन्थेऽस्मिन् तैस्तैर्दार्शनिकैः कालक्रमेण स्वीकृतानि प्रमाणानि निरूपितांश्च प्रमेयभागान् सङ्ग्रहेण विशदीकृत्याल्पीयसैव कालेन दार्शनिकान् विषयानधिजिगांसूनां मनोरथसिद्धिर्यथा स्यात्तथाविधः प्रकारो ग्रन्थकृताऽवलम्बितः। भाषया, शैल्या, विषयनिरूपणपद्धत्या च ग्रन्थोऽयं विद्वन्मणीनां मनांस्यावर्जयेदिति विश्वसिमि। ग्रन्थप्रणयने मातृकारूपेण संस्थितानां ग्रन्थानां सम्पादने मननव्यापारविशेषैकगोचराणां विषयाणामन्वेषणे च प्रवृत्तिः प्रायो विलुप्तैव संस्कृत-समाजे। अस्मिन् व्यतिकरे श्रीमानुपाध्यायः शोभनमिदं ग्रन्थप्रणयनमकार्षीदिति सन्तुष्टान्तरङ्गो निखिलश्रेयःपरम्परामवाप्यायं पण्डितवरः परमां प्रतिष्ठां लभतामिति भगवन्तमुमारमणमीडे।

वाराणसी
दिनांक १०।१०।८१

पट्टाभिरामशास्त्री

सं० सं० विश्वविद्यालयस्य भू० पू० कुलपतीनाम् आचार्यश्रीपण्डितप्रवरबदरीनाथशुक्लमहोदयानां शुभाशंसनम्--

मनुष्यः संसारस्य सर्वोत्तमः प्राणी। सर्वोत्तमता च तदीया तस्य बौद्धिक-क्षमतोपजीवनी। 'बुद्धिर्यस्य बलं तस्य' इति नीत्या प्राणिषु सर्वतोऽधिकबुद्धितया स एव सर्वतो बलवान्, आत्मनो बुद्धिबलादेव स समग्रस्य जगतः शासको बुभूषति, एषा बुभूषैव तस्य सर्वप्रवृत्तीनां मूलम्। कियन्मात्रेणैव चिन्तनेन सत्यमिदं विस्पष्टं चकास्ति 'मनुष्य एव जगतः सम्पूर्णस्य प्रवृत्तिचक्रस्य केन्द्रबिन्दुः। 'अहमस्मीति' स्वात्मनोऽस्तित्वस्य चिरप्ररूढा तदीया धारणैव तत्समग्रचिन्तनस्य मुख्यो हेतुः।

मनुष्यो यत् क्रीडति, कूर्दति, हसति, रोदिति, खादति, पिबति, स्वपिति, जागर्ति पठति, लिखति अन्यद् वा किमपि व्यवस्यति तत्सर्वमात्मतुष्टिमुद्दिश्यैव, तदित्थं सर्वथा सुस्पष्टं-मनुष्यस्य सर्वस्याः प्रवृत्तेरेकमात्रमूलं स्वात्मसन्तोषणस्य तदीया प्रबला भावनैव।

मनुष्यस्य स्वरूपानुसन्धानसम्बन्धे देशेऽस्मिन् या चिन्तनधारा प्रावहत् तस्य वास्तविकतायाः परिज्ञानाय यो महान् प्रयत्नः प्रारभत, एतदर्थं सुधीजनैर्यच्चिरं तपोऽतप्यत, कृत्स्नः सोऽनुवर्तिविदुषामध्ययनस्य विस्तृतो विषयः समपद्यत।

मानवस्वरूपाध्ययनस्य सौकर्यसम्पादनाय मानवस्वरूपगोचराणां विभिन्नचिन्तनानां मनीषिभिर्यो विभागो विहितः; स देशेऽस्मिन् दर्शनपदं प्रापत्। सर्वेषु दर्शनेषु प्रमाणप्रमेये, पदपदार्थौ, सृष्टिप्रलयौ, जीवेशौ, बन्धमोक्षौ, अर्थकामौ, पुनर्जन्ममृत्यू, ज्ञानाज्ञाने एवमादयो विषया बहुधा चिन्तिताः। समेषामेषां दार्शनिकविचाराणां यथाशक्यसमन्वयेनात्मस्वरूपनिर्णयानुगुण्यसम्पादनं नितरामावश्यकम्। एतदर्थं कश्चिदेक ईदृशो ग्रन्थो निर्माणमपैक्षत, यो भव्यया भाषया विशदसरलया विवेचनशैल्या वैपुल्यविधुरेण वपुषा च लक्ष्यमिदं पूरयेत्।

हर्षस्यैष विषयो यत् स्तुत्यप्रतिभेन काव्यप्रणयनकलाकुशलेन प्रस्तुतग्रन्थप्रमाणकसर्वदर्शनसिद्धान्तसत्यावबोधेन चिरजीविना श्रीमता शिवजी उपाध्यायेन 'सर्वदर्शनविमर्श'-नामा पद्यमयोनूतनोऽनवद्यः कारिकाग्रन्थो निर्माय दार्शनिकतत्त्वविविदिषूणां प्राप्यतामुपनीतः। अत्र प्रतिपाद्यानां विततो विमर्शः, परामर्शेषु प्रततो दर्शनसिद्धान्ताननाविलं प्रकाशं नेष्यतीति विश्वासेन प्रशस्यप्रस्तुतग्रन्थप्रणेतारं श्रीमन्तमुपाध्यायं सानन्दमभिनन्दयति—

बदरीनाथशुक्लः
भू० पू० कुलपतिः
सं० सं० वि० वि० वाराणसी

वाराणसी
वि० सं० २०३८

सं० सं० विश्वविद्यालयस्य प्रा० व्याकरणविभागाध्यक्षचराणां व्याकरणकेसरिणां श्रीमतां पं० रामप्रसादत्रिपाठिमहेच्छानां शुभाशंसनम्—

जगतः खलु मूलतत्त्वसम्प्रेक्षणं प्रमाणैकसाध्यम्, "मानाधीना मेयसिद्धिरिति" सिद्धान्तात्। प्रमाणं तु नैकमेव, अपित्वनेकम्। कारणभेदात्कार्यभेद इति नियमेन प्रमाणभेदाद् दर्शनभेद इति सुनिश्चितमेव। तत्र मूलतत्त्वानुसन्धाने समर्थं प्रमाणं प्रत्यक्षमिति केचन संगिरन्ते, इतरे त्वनुमानम्, अपरे श्रुतिं तन्मूलकस्मृत्यादिकं चेति मन्यन्ते। अनया रीत्या प्रात्यक्षिकम्, आनुमानिकं श्रौतं चेति दर्शनानां त्रैविध्यं सम्पन्नम्। तत्र प्रत्यक्षमेव प्रमाणं मन्वानाः प्रात्यक्षिकाश्चार्वाकपदेन व्यपदिश्यन्ते। प्रत्यक्षं प्रमाणं स्वीकुर्वाणा अपि मूलतत्त्वान्वेषणे येऽनुमानप्रमुखास्ते आनुमानिकाः। ये च प्रत्यक्षमनुमानं चापेक्ष्य श्रुतिप्रधानास्ते श्रौताः। तत्रानुमानिका द्विविधाः—अवैदिका वैदिकाश्च। वेदस्य प्रामाण्यमनभ्युपगच्छन्त आद्याः, तदितरे द्वितीयाः। आद्याः पुनस्त्रिविधाः—चार्वाकाः, ऐकान्तिकाः, अनैकान्तिकाश्च। तत्र पृथिव्यादीनि चत्वार्येव भूतानि प्रत्यक्षप्रमाणगम्यानि सत्यानि, अन्यत्सर्वमसत्यम्, वैषयिकं सुखमेव सारसर्वस्वमिति चारुवाक्यं ब्रुवाणाश्चार्वाकाः प्रोच्यन्ते। बौद्धाश्चैकान्तिका उच्यन्ते। जैनाचार्याश्चानैकान्तिकाः। वेदप्रमाणेन परलोकं मन्वाना वैदिका माहेश्वरवैशेषिकनैयायिकसांख्यपातञ्जलपूर्वमीमांसकवेदान्तिकादिभेदाद् बहुविधाः। बहुविधानि चैतेषां दर्शनानि संदृब्धानि।

एषां भारतीयदर्शनसिद्धान्तानां ज्ञानमेकेनैव ग्रन्थेन सरलतया पद्धत्या सम्भवेदिति मनसि विचार्य दार्शनिकसार्वभौमेन श्रीमाधवाचार्येण 'सर्वदर्शनसंग्रहाभिधो ग्रन्थो व्यरचि। ततोऽपि सिद्धान्तज्ञाने काठिन्यमनुभूय सं० सं० विश्वविद्यालयस्य साहित्यविभागे यथार्थमध्यापकपदमलङ्कुर्वता सचेतसा श्रीमता शिवजी उपाध्यायमहोदयेन 'सर्वदर्शनविमर्शः' इत्यभिधया भूषितः सरसपद्यमय आदर्शभूतो ग्रन्थोऽद्यतनजिज्ञासुजनानां समक्षमुपस्थापितः। सकलदर्शनसिद्धान्तप्रकाशकमीदृशग्रन्थरत्नमितः पूर्वं नैव दृष्टिपथमागतमिति प्रयासेनानेन जिज्ञासवः प्रमोदन्तां भगवन्तौ भवानीविश्वेश्वरौ च प्रीयेतामिति भृशं कामयते—

वाराणसी
वि० सं० २०३८

रामप्रसादत्रिपाठी
प्रा० व्याकरणविभागाध्यक्षचरः;
सं० सं० विश्वविद्यालये
वाराणस्याम्।

मीरजापुरस्थ सं० सं० महाविद्यालयस्य प्राचार्यचराणां लब्धपञ्च-स्वर्णपदकानां राष्ट्रपतिपुरस्कृतिभाजां परमविदुषां श्री पं० सरयूप्रसाद उपाध्यायमहाशयानां शुभाशंसनम्—

सहस्राधिककारिकानिबद्धः सर्वदर्शनसिद्धान्तसमर्थनपरः सर्वदर्शनविमर्शाख्यो ग्रन्थोऽभिनवकालिदासप्रतिमप्रतिभाशालिभिः साहित्याचार्यैः सं० स० विश्वविद्यालयस्य साहित्यविभागीयप्राध्यापकपदमलङ्कुर्वाणैः श्रीशिवजी उपाध्यायमहोदयैर्विरचितः। तत्र विषयवैशद्यं दर्शनस्य जीवनोपयोगित्वं समेषां दर्शनानां समन्वयनञ्च सम्यक् स्फुटीकृतं वरीवर्ति। अवलोक्य चेमं ग्रन्थं सर्वदर्शनसंग्रहाख्यं ग्रन्थं प्रत्यपि श्रद्धालवस्तिरोहितो भवति। अदृष्टाश्रुतपूर्वोऽयं ग्रन्थोऽकस्मादेवाध्येतॄणां मनस्सु परमां प्रीतिमानन्दातिरेकञ्च जनयति। दर्शनतत्त्वजिज्ञासूनां छात्राणामतीवोपकारकश्चायं ग्रन्थः।

अन्ते च करुणावरुणालयं भूतभावनं भगवन्तं विश्वनाथं प्रार्थये यदिमं ग्रन्थकर्तारं चिरायुषा लोकोत्तरकीर्त्या च संयोज्य भगवान् भवानीजानिः कुशलिनं कुर्यादिति।

मीरजापुरम्
वि० सं० २०३८

सरयूप्रसाद उपाध्यायः
मीरजापुरस्थ सं० सं०
महाविद्यालयस्य प्राचार्यचरः

सं० सं विश्वविद्यालयस्थानुसन्धानसंस्थाननिदेशकपदमलङ्कुर्वतां श्रीमतां डॉ० भागीरथप्रसादत्रिपाठिवागीशशास्त्रिमहोदयानां शुभाशंसनम्—

दर्शनं नाम खल्वाभ्यन्तरं चक्षुः। तस्योन्मीलनेन समुद्भासन्ते पदार्था भौतिका आध्यात्मिकाश्च। मणिपूरकचक्रस्था पश्यन्ती तदेवान्तरं चक्षुर्वैश्वानरसंदीप्तिसमिद्धमित्याम्नायविदो विदुः। यन्त्रातीतं ज्ञानमाविर्भावयतीदमिति वैशिष्ट्यमेतदीयं विलसति। द्वैविध्यं प्रथितं भारतीयदर्शनानाम् आस्तिकनास्तिकेति पद्धया। तत्रापि षट्स्वपि भेदेषु प्रसरन्ति पुष्कलाः शाखाः प्रशाखाः प्रवालाश्च।

सकलभारतीयदर्शनसिद्धान्तज्ञानमाशु समासादितं स्याज्जिज्ञासुभिरेकस्थमिति तत्समाहारश्चिरेण चिकीर्षित आसीदेकस्मिन् ग्रन्थे। चतुर्दश (१३५०) खीस्तशताब्दीकेनानूनकदर्शनशास्त्रनदीष्णेन लब्धवर्णेन माधवाचार्येण काठिन्यमिदं विभाव्य 'सर्वदर्शनसंग्रहः' इत्याख्या महार्घा दर्शनसिद्धान्तरत्नमञ्जूषा दार्शनिकोत्तंसेभ्यो जिज्ञासुभ्यश्च समुपायनीकृता। यद्यपि तदनु द्वित्रा अन्येऽपि समभूवन् प्रयासाः, तथापि ते सर्वे गद्यात्मनैव समवातरन् सर्वदर्शनसंग्रहनीकाशाः। जिज्ञासूनां सारल्येन हार्देन गेयतया च हृद्यता पद्यपदव्या यथा जञ्जन्यते तात्त्विकी, न तथाऽसौ दन्ध्वन्यते गद्यात्मना जातुचित्।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यविभागीयेष्वध्यापकेष्वन्यतमः सहृदयः कविहृदयः श्रीशिवजी-उपाध्यायो जिज्ञासुजनमनोरञ्जनकामनया व्यातनोत् संग्रहेणच्छन्दोमुखेन सर्वदर्शनविमर्शाख्यं निखिलदर्शनरत्नोपहारात्मकमिमं भव्यं सुपेटकम्। नैतादृशं सर्वदर्शनविभावितं पद्यपदवीकं ग्रन्थरत्नमितः पूर्वं कुतश्चित् प्रकाशमितमिति यथावेदमुदीर्यते। प्रयत्नेनानेन बुधवरा मुदमाप्नुयुर्जिज्ञासुजनाश्च नूनमुपकृता भवेयुरिति ध्रुवं प्रत्येति--

वाराणसी
श्रीपञ्चम्यां २०३८ वै०

भागीरथप्रसादत्रिपाठी (वागीशः शास्त्री)
निदेशकः
अनुसन्धानसंस्थानस्य

मीरजापुरान्तर्गत सं० सं० महाविद्यालयस्य साहित्यविभागाध्यक्षपण्डितश्रीदुर्गादत्तोपाध्यायवर्याणां पद्यपुष्पाश्चितशुभाशंसा—

काशी ज्ञानप्रकाशी प्रतिवसति सदा यत्र देवोऽविनाशी
भक्तैर्गङ्गातरङ्गाः प्रतिदिवसमलं प्रातराशीक्रियन्ते ।
आश्लेषं यत्र मुक्तिर्वितरति सततं जीवितेभ्यो हसन्ती
मुक्तिर्मृत्युं गतेभ्यो ननु धवलतमा मौक्तिकी स्रग्धरा च ॥ १ ॥

धर्मानुष्ठानजालं प्रतिदिनमभितो यत्र वैविध्यपूर्णं
नित्यं कुर्वन्त्यनेके शुचिमतिमनसो धार्मिका ईशभक्ताः ।
साहित्ये सद्विभागे धृतवपुरनिशं श्रीशिवस्तत्र साक्षा-
दास्ते विद्योतमानो विबुधवरवचोविश्वविद्यालयस्य ॥ २ ॥

सत्सर्वदर्शनविमर्श - इति प्रसिद्धो
ग्रन्थः समन्वयपरः स च काव्यबद्धः ।
लोकोपकारधिषणेन विदांवरेण,
निर्मथ्य दर्शनचयं निरमायि तेन ॥ ३ ॥

ग्रन्थाम्बुराशौ विनिमज्य लोका
गच्छन्तु मुक्तिं विततेऽदसीये ।
अर्थं च धर्मं च तथैव कामं
कामं लभन्तां पुरुषार्थसङ्घम् ॥ ४ ॥

जयतु जयतु नित्यं श्रीशिवः पण्डितेन्द्रो
जयतु जयतु दिव्या तत्पुराणी च वाणी ।
जयतु जयतु काम्यं ग्रन्थरत्नं तदीयं,
जयतु जयतु लोके तद्यशोमञ्जुहंसी ॥ ५ ॥

वर्षे सिद्धिगुणाभ्रलोचनमिते श्रीविक्रमीये शुभे
मासे चाश्वयुजे बृहस्पतिदिने शुक्ले दशम्यां तिथौ ।
प्राकाश्यं भजमान एष रुचिरो ग्रन्थो हि शैवं यशो
लोके वर्धयतामभीच्छति चिरं विन्ध्याचलस्थः कविः ॥ ६ ॥

दुर्गादत्त उपाध्यायः
मीरजापुरस्थ सं० सं० म० वि०
साहित्यविभागाध्यक्षः

FOREWORD

I feel highly delighted in introducing the work *Sarva-darśana-vimarśa* to the Sanskrit Scholars who are desirous of knowing what has been said and thought about the various subtle problems of the empirical and transcendental world by the ancient philosophers and thinkers of India. The work, coming as it does from the pen of an erudite scholar, is unsurpassed in the depth and the profundity of the treatment. This the author achieves by comparing the various views expressed by Indian thinkers with each other and by critically evaluating them. Even so, it is composed in a lucid language, in a simple style and does not burden the reader with an undue number of technical problems. This must be considered as its greatest advantage since the works on Indian Philosophy are often written in such an intricate language that they defy the efforts of non-scholars at understanding them. Only a scholar who has fully grasped and digested the teachings of the various schools of Indian Philosophy can produce such a masterly work in such a simple language.

Shri Upadhyaya's approach is basically an analytical and critical one; but it is universal in treatment and syntactical in approach. He takes up various problems of philosophy, refers to the opinion of different thinkers on it, analyses them critically and then advances his own opinion as to their appropriateness or otherwise. The division of the work by the author into various sections and sub-sections marks a difference from the convention and exhibits originality and ingenuity.

The work thus is a comprehensive survey of Indian Philosophy, of the problems posed by the Indian mind in

discovering the ultimate Truth and of the solutions and answers evolved by it to those problems. Shri Upadhyaya very often does not adhere to the conventional notions and views and suggests his own mature and well-thoughtou opinion on various problems of philosophy. It is rather amazing that this work comes from the pen of a person who is well-known in the field of modern Sanskrit Literature for his beautiful lyrics and whose primary interest is perhaps 'Sāhitya'. **But** then he seems to continue the tradition of such illustrious Sanskrit Poets as Śrīharṣa who was as well-versed in literary delicacies as in the terse and dry subject of philosophy.

I congratulate Shri Upadhyaya for presenting such a nice work to us, the Sanskritists, and am confident that its publication shall be highly acclaimed by all concerned.

G. C. Tripathi
Principal

G. N. Jha Kendriya
Sanskrit Vidyapeetha,
Motilal Nehru Park,
Allahabad 2.

INTRODUCTION

Philosophy, a systematic and rich heritage of the Seers of the world in general and, of India in particular, I never profess to know. Nevertheless, I deem it a great honour and privilege and feel pleasure to introduce Sarvadarśana-Vimarśa, an epitome containing different tenets of almost all the systems of Indian Philosophy, put skilfully and scholarly in a nutshell by my learned friend Shri Shivaiupadhyaya, to the world of scholars. The work, a fresh and poetic attempt of a scholar of profound learning and erudition, seems to take a significant place in the line of Ṣaḍdarśana-samuccaya, Sarvadarśana-samgraha, Darśanodaya and Darśanasopāna and to a considerable extent, it excels these all in bestowing poetic expression to the postulates of all the philosophical systems. Impartial and unprejudiced treatment of various views propounded by our ancient Indian thinkers, is rightly conforming to the humble vow of Shri Upādhyāya, at the very out-set of the work—

न दर्शनं किञ्चन तत्त्वतोऽन्यथा,
यथार्थमेवार्थनिगूढमस्ति तत् ।
ममत्वमुत्सृज्य विवेकशालिनी,
मतिः क्वचिन्मूढगतिं न विन्दति ॥ (मङ्गलाचरणम्)

After a sincere perusal of all the Kārikās of this epitome I have the least hesitation in ascertaining that the author has, successfully, maintained his judicious and discriminative attitude in stating all the views. The honest efforts to estabish consistency among various tenets is consistently visible throughout the book and this can be considered as the greatest achievement of the author.

The work consists of eight Parāmarśas, each one of which is divided into different Vimarśas throwing ample light upon the metaphysical and epistemological views of all the systems of Indian Philosophy. Shri Upādhyāya, primarily, being a well-known figure in the field of modern Sanskrit-literature for his creative poetic talent, has appreciably, given the form of 'an advice in the manner of a beloved' (कान्तासम्मित उपदेश) to the terse and dry topics of Philosophy. Within a brief compass, in a style which is, obviously, lucid, simple and interesting, this work gives an able and well-grounded exposition to the leading philosophical doctrines and adds comparative, critical, original and ingenious remarks, where required. The later half of the second Kārika 'मूलतत्त्वमेकं तत् सर्वत्र प्रतिपादितम्', itself, declares the aim, object and the aptitude of Shrī Upādhyāya.

I congratulate Shrī Upādhyāya for presenting such a substantial piece of work in the sphere of Indian Philosophy and am confident that it will be properly appreciated by those for whom it is intended.

Dr. Kapil Deo Pandey,
Head of the Deptt. of Sanskrit,
Arya Mahila Degree College,
Varanasi.

K. D.Pandey

सर्वदर्शनविमर्शः

मङ्गलाचरणम्

चञ्चच्चूडान्तचुम्बत्सुरसरिदुदयत्कूटकौटिल्यभावो-
द्रेकामेकान्तरोषाद् विलुलितवदनां मानिनीमम्बिकां ताम् ।
देवि ! प्रेम्णा प्रसीदेत्यनुनयनविधौ तत्परश्चाटुकारो,
द्रागारोप्याङ्कपालीमनुमुदितशिवो यश्शिवस्सोऽवतान्नः ।। १ ।।

अपैतु परितो वृहत्करुणदैन्यसैन्योद्भव-
त्तमोघटितविग्रहा विकटकष्टदा यामिनी ।
नवेन्दुकिरणोल्लसत्सरिदमन्दधाराभृतो-
भवस्य वरभामिनी भरतु भव्यतां भारते ।। २ ।।

स्वान्ते सद्यस्स्फुरितविमलज्ञानसन्धानशान्ते,
नश्यद्ध्वान्ते शमसमुदयादुद्यदानन्दकान्ते ।
क्वाप्येकान्ते चिरमनुमिलन्नेत्रनासापुटान्ते,
पूर्णोपान्ते भवति महतां योगिनां तत्त्वबोधः ।। ३ ।।

शान्तेन दान्तेन नितान्तमन्तः-
कान्तेन चित्तेन समत्वयोगात् ।
समन्ततोऽप्यस्खलितात्मवृत्ति-
र्विद्वान् परं सत्यपदं वृणोति ।। ४ ।।

न दर्शनं किञ्चन तत्त्वतोऽन्यथा,
यथार्थमेवार्थनिगूढमस्ति तत् ।
ममत्वमुत्सृज्य विवेकशालिनी,
मतिः क्वचिन्मूढगतिं न विन्दति ।। ५ ।।

स्वीयम्

अथायं 'सर्वदर्शनविमर्श' इत्याख्यो नवीनः सर्वदर्शनसिद्धान्तसमन्वयसमाहारः सुधियां समक्षमधीक्षणाय परीक्षणाय च सम्यगुपन्यस्यते। नैकविभिन्नमताभिमतपथानुसारितत्तद्दार्शनिकसिद्धान्तान् समाहृत्य सर्वसमर्थनस्पृशा दृशा समुचितसन्निवेशविशेषेण महता प्रयासेन मयाऽयं विमर्शो विहितः। तदत्र गुणैकपक्षान्तर्निष्ठधिषणा मनीषिणः प्रमाणम्।

दर्शनं खलु दर्शनान्तरसापेक्षं खण्डनीयतां मण्डनीयतां वा सदर्हति। निरपेक्षं तु तत् स्वस्मिन् सदेवोन्मीलयच्चकास्तितराम्। 'एकं सद् विप्रा बहुधा वदन्तीति श्रुत्यनुसारं भूयोभेदविरुद्धबहुवादनिगुम्फितेष्वपि तेषु भारतीयदर्शनेषु किमप्यद्भुतं साम्येन परिशील्यमानं सामञ्जस्यमाञ्जस्येन सन्तो निभालयाञ्चक्रुः। एतदेवोद्दिश्य गीतायां भगवताऽप्युक्तम्— 'पण्डिताः समदर्शिन' इति।

इदमेव सर्वत्रानुस्यूतं साम्यतत्त्वं मनस्याकलय्य ग्रन्थेऽस्मिन्नष्टौ परामर्शाः दर्शनमर्मविदां विदुषां कृते विमर्शमाध्यमेन प्रदत्ताः। यदि च किञ्चिदपि कथञ्चिदलम्भि साफल्यमत्र तदा तत्रापि प्राचामाचार्याणामर्वाचां विपश्चितां चाहेतुककृपालव एवैकमात्रहेतुरित्यवगम्यते।

येषां दार्शनिकप्रवराणां ग्रन्थेभ्योऽत्र साहाय्यमवाप्तं तेभ्यो विनतिततिर्वितीर्यते। ये चास्मद्गुरवः सुहृदश्च शुभाशंसनानि प्रदाय भूमिकादिकं च विलिख्य मामुपाकुर्वन्, तेषां कृतेऽधमर्णतां कृतज्ञताञ्चातितरां प्रकाशयामि।

अन्ते च शिक्षामन्त्रालयस्याधिकारिणामुपकारभारं शिरसाऽऽवहामि, यैर्दत्तेनार्थिकसाहाय्येन ग्रन्थोऽयं प्राकाश्यमुपगतः। किञ्च समुद्रणालयप्रबन्धकाखिलमुद्रकजनेभ्यः साधुवादाः प्रदीयन्ते, यैः काले कार्यमिदमनुष्ठितम्।

किं बहुना—

"आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति कालिदासीयं वचनमनुस्मृत्य स्वात्मानं विद्वत्परितोषपात्रीकर्तुकामोऽहं विरमामि।

वाराणसी
वि० सं० २०३८

विदुषामाश्रवः—
शिवजी उपाध्यायः

सर्वदर्शनविमर्शः

मङ्गलाचरणम्

चञ्चच्चूडान्तचुम्बत्सुरसरिदुदयत्कूटकौटिल्यभावो-
द्रेकामेकान्तरोषाद् विलुलितवदनां मानिनीमम्बिकां ताम् ।
देवि ! प्रेम्णा प्रसीदेत्यनुनयनविधौ तत्परश्चाटुकारो,
द्रागारोप्याङ्कपालीमनुमुदितशिवो यश्शिवस्सोऽवतान्नः ।। १ ।।

अपैतु परितो वृहत्करुणदैन्यसैन्योद्भव-
त्तमोघटितविग्रहा विकटकष्टदा यामिनी ।
नवेन्दुकिरणोल्लसत्सरिदमन्दधाराभृतो-
भवस्य वरभामिनी भरतु भव्यतां भारते ।। २ ।।

स्वान्ते सद्यस्स्फुरितविमलज्ञानसन्धानशान्ते,
नश्यद्ध्वान्ते शमसमुदयादुद्यदानन्दकान्ते ।
क्वाप्येकान्ते चिरमनुमिलन्नेत्रनासापुटान्ते,
पूर्णोपान्ते भवति महतां योगिनां तत्त्वबोधः ।। ३ ।।

शान्तेन दान्तेन नितान्तमन्तः-
कान्तेन चित्तेन समत्वयोगात् ।
समन्ततोऽप्यस्खलितात्मवृत्ति-
र्विद्वान् परं सत्यपदं वृणोति ।। ४ ।।

न दर्शनं किञ्चन तत्त्वतोऽन्यथा,
यथार्थमेवार्थनिगूढमस्ति तत् ।
ममत्वमुत्सृज्य विवेकशालिनी,
मतिः क्वचिन्मूढगतिं न विन्दति ।। ५ ।।

सद्दर्शनोदितवचोभिरनूद्यमानं,
सिद्धान्तमत्र निखिलं कृतमल्पबुद्ध्या ।
सम्यग् विमृश्य सुधियो मुदमाप्नुवन्तु,
नो नास्तिकास्तिकविवादपथं प्रयान्तु ॥ ६ ॥

परमतत्त्वदृशां विदुषां मते,
विधिनिषेधमतिर्न निधीयते ।
उभयमप्युभयार्थमुपाहितं,
तदपहाय सुखं सदवाप्यते ॥ ६ ॥

अथ प्रथमः परामर्शः

सुखादिभूमिविमर्शः

दर्शनाद् दर्शनं श्रेयस्सामञ्जस्येन दर्शितम् ।
सर्वोपनिषदामेतत्तत्त्वमाहुर्मनीषिणः ॥ १ ॥

प्रत्येकं दर्शनं भेदान्मार्गमापद्यते पृथक् ।
मूलतस्तत्त्वमेकं तत् सर्वत्र प्रतिपादितम् ॥ २ ॥

तत्त्वमस्यादिवाक्यानां सामान्यान्नो पृथग्विधिः ।
वैशिष्ट्याद्भेद इत्याहुरम्भो वारिमुचामिव ॥ ३ ॥

साधनानां विभेदेऽपि साध्यं नैव विभिद्यते ।
साम्यादन्तर्निगूढं तत् तात्पर्यं परिचीयते ॥ ४ ॥

दुःखान्निवृत्तिरत्यन्तं सुखावाप्तिश्च सर्वतः ।
मुख्यमुद्देश्यमेवैतत् तात्पर्यादवसीयते ॥ ५ ॥

त्रिविधं दुःखजालं तद् विधूय प्रातिभासिकम् ।
निश्शेषानन्दसम्प्राप्तेर्जीवो यायात्परांगतिम् ॥ ६ ॥

यस्मान्नैवाधिकं किञ्चिद् यस्मान्नो भ्रंशउद्भवेत् ।
यस्मान्नाशो नवा ह्रासस्तदेवात्यन्तिकं सुखम् ॥ ७ ॥

नाभिलाषो भवेदन्यो नाभिलापश्च नाश्रवः ।
वाङ्निवृत्त्या ह्यनिर्वाच्यं यत्तदात्मसुखं महत् ॥ ८ ॥

पुरुषार्थतया लोके प्राप्तव्यं तन्मनीषिणा ।
मुक्तिर्मोक्षश्च निर्वाणं कैवल्यमिति तद्विदः ॥ ९ ॥

एतदेवान्ततः प्राप्तुं मार्गभेदाननेकधा ।
निर्दिशन्त्यात्मतत्त्वज्ञा वस्तुतोऽभिन्नमेव तत् ॥ १० ॥

प्राणिमात्रस्य लोकेऽस्मिन् दुःखनाशात्सुखार्थिता ।
नैकोपायान्वयाकाङ्क्षा प्रत्यगेवोपजायते ।। ११ ।।

विषयान्नो निवर्तन्ते तृष्णालोभादयोऽप्यमी ।
तस्माद्धानाय चैतेषां चेष्टितव्यमहर्निशम् ।। १२ ।।

तृष्णायां विनिवृत्तायां नाभावो बाधतेतराम् ।
तदैवाभासते सम्यग् ज्योतिरन्तस्सुखास्पदम् ।। १३ ।।

शब्दस्पर्शादयो ये वा लौकिकानन्दहेतवः ।
तेष्वेको रमते चान्यः प्रतीतिं नाभिपद्यते ।। १४ ।।

रुचीनां भिन्नरूपत्वात् कस्य किं मनसः प्रियम् ।
नो निश्चेतव्यमित्येतल्लौकिकं हेयमेव तत् ।। १५ ।।

लोकोत्तरसुखं न्यूनाधिक्याभावाद् व्यवस्थितम् ।
तत्र काचित् परा शान्तिश्शान्ते ह्यनुभूयते ।। १६ ।।

अनागतस्य दुःखस्य हेयत्वात् सुखमुत्तमम् ।
अतीतं वर्तमानं वा तन्न तादृग् विरुध्यति ।। १७ ।।

हेतोर्नाशाद् ध्रुवं नाशस्तत्कार्यस्यापि जायते ।
हेतुहेतुमतोः कश्चित् सम्बन्धो दुःखमुच्यते ।। १८ ।।

सुखं सातिशयं लोके दृश्यते चानुभूयते ।
पारलौकिकमेवैतत्तद्वदेव प्रसिद्ध्यति ।। १९ ।।

तज्ज्ञानाभावतो मा भूदावश्यकतया तु तत् ।
सत्तायामुपलब्धिस्स्यादसत्तायां कथं नु सा ? ।। २० ।।

दृष्टे सातिशये तस्मिन् साहचर्यादिदं स्थितम् ।
अदृष्टस्यानुभूतौ तु प्रमाणं नोपलभ्यते ।। २१ ।।

नैरातिशय्यं नो दृष्टं नानुभूतं न वा श्रुतम् ।
सुखस्य प्रतिपन्नत्वे सातिशय्यं निचाय्यते ।। २२ ।।

आत्यन्तिकं सुखं यच्च शास्त्रेषु प्रतिपादितम् ।
तत्रानुभव एवास्ति प्रमाणं परिकल्पितम् ।। २३ ।।

सर्वदुःखनिवृत्त्यात्मा पदार्थोऽसौ परावधिः ।
व्यष्टिमात्रोपलब्धित्वात्तत्समष्टिर्न युज्यते ॥ २४ ॥

सत्तावत्त्वे न दृष्टत्वं दृष्टत्वे तद्विनिश्चयः ।
उभयं नाभिमन्तव्यं व्यक्तिभावाद् विरोधिता ॥ २५ ॥

सर्वज्ञानस्य नैकत्र सम्भवो नापि निश्चयः ।
व्यक्तिशो भिन्नरूपत्वात्तदस्तित्वं विभिद्यते ॥ २६ ॥

दुःखहानात् सुखावाप्तिस्सर्वथा सर्वसम्मता ।
नैरातिशय्याज्जातायां तस्यां लोकोत्तरा श्रुतिः ॥ २७ ॥

सातिशय्येन चेदस्य सुखस्य परिकल्पना ।
नैरातिशय्यमेवेत्थं कुतो न परिकल्प्यते ॥ २८ ॥

सर्वाधिकं सुखी सोऽहं भवेयमिति लौकिकात् ।
प्राणिनोऽनुभवात् कश्चित् पदार्थोऽलौकिको मतः ॥ २९ ॥

सुखं तस्याश्रयो वा स्यात्तदभावात् किमिच्छया ।
सर्वस्मादुत्तमत्वेन निर्विशेषो न हीयते ॥ ३० ॥

सर्वाधिकसुखेच्छायास्सत्त्वादेव प्रतीयते ।
यस्मान्नैवाधिकं किञ्चित् तत्सुखं स्यादलौकिकम् ॥ ३१ ॥

सर्वोऽपि मानवः प्राप्तसुखापेक्षाऽधिकं सुखम् ।
प्रत्यहं वाञ्छति प्रायो निवृत्तिस्तस्य तादृशी ॥ ३२ ॥

सोऽयं नैसर्गिको भावः प्राणिनां तत्सुखार्थिनाम् ।
यदाप्तौ नैव चाप्तव्यं किञ्चिदेवावशिष्यते ॥ ३३ ॥

सुखावाप्तेः पराकाष्ठा यत्र नेच्छा प्रवर्तते ।
सोऽपवर्गोऽथवा मोक्षोऽभिलाषोपनतो भवेत् ॥ ३४ ॥

श्रुतीनां प्रतिपाद्यत्वादुद्देश्यत्वाच्च देहिनाम् ।
आस्पदत्वादशेषेण पदं तत्स्यादनामयम् ॥ ३५ ॥

सर्वान् कामान् समाश्रित्य सोऽश्नुतेऽभयमृच्छति ।
प्रकामप्रतिपन्नत्वादमृतत्वं च गच्छति ॥ ३६ ॥

भाविदुःखप्रहाणेच्छावशाद् वैकल्यमुद्भवेत् ।
तद् भयं नाम लोकेऽस्मिस्तल्लेशादपि तद्व्यथा ॥ ३७ ॥

जन्ममृत्यूद्भवं दुःखं सर्वलोकभयङ्करम् ।
ततो मुक्तिः परा शान्तिर्निर्वृतिस्सैव कल्प्यते ॥ ३८ ॥

दुःखनाशात्सुखावाप्तिस्सर्वस्याभीप्सिता यदि ।
मुमुक्षुस्सर्वलोकोऽयं जायते तत्कथं न सः ? ॥ ३९ ॥

न च सर्वस्तथाभूतो नापि दुःखं निवर्तते ।
मोक्षोऽप्येवं न सर्वस्य सुखं नाप्यत्र सर्वगम् ॥ ४० ॥

ज्ञानाभावात् समग्रस्य तत्प्रणाशप्रवर्तना ।
नैव सञ्जायते लोके प्रवृत्तिर्ज्ञानपूर्विका ॥ ४१ ॥

दण्डचक्रादिकज्ञानात् कुम्भकारप्रवृत्तिवत् ।
साधनज्ञानतस्साध्यप्रवृत्तेरुदयो भवेत् ॥ ४२ ॥

सामान्याद् दुःखतो मुक्तिं वाञ्छतामपि देहिनाम् ।
अज्ञातत्वान्न युज्येत मुमुक्षुत्वं विशेषतः ॥ ४३ ॥

निश्चयात्तस्य विज्ञानात्प्राप्तव्यत्वादशेषतः ।
श्रुतिसम्मतभावत्वान्निर्विशेषाच्च तत्सुखम् ॥ ४४ ॥

मुमुक्षूणां न सा संख्या भूयसी सम्भवत्यपि ।
द्वित्रास्ते पञ्चषा वा स्युर्लोकेऽस्मिन् ज्ञानचक्षुषः ॥ ४५ ॥

त्रिविधा मनुजा लोके दृश्यन्ते सुखमिच्छवः ।
तत्साधनसमापन्ना न्यूना ऊनाः पृथक्कृताः ॥ ४६ ॥

तत्र पूर्वे प्रवर्तन्ते मोक्षमार्गेषु सद्धिया ।
द्वितीये स्वेषु वर्तन्ते विवर्तन्तेऽपरे मुधा ॥ ४७ ॥

ऐहिकं सुखमाश्रित्य तत्प्राप्त्याशाविवर्धनात् ।
नो पारलौकिकं चाप्तुं चेष्टन्ते ते निजेच्छया ॥ ४८ ॥

अङ्कुरोत्पादनं यद्वद् भृष्टबीजान्न जायते ।
दुर्बलाशानिबद्धानां तद्वदिच्छा निवर्तते ॥ ४९ ॥

ऐहिके सुखलेशादप्युदीयान्नो परामतिः ।
ईश्वरानुग्रहादेव परार्थे धीः प्रवर्तते ।। ५० ।।

य ईशते तत्पदमाप्तुमक्षयं,
स ईश्वरः प्राणितया प्रतिष्ठितः ।
स्वतस्स्वमुद्धर्तुमतः प्रयत्नवान्,
स्वरूपतस्तत्र परेऽवशिष्यते ।। ५१ ।।

अथ द्वितीयः परामर्शः

वेदान्तादिमतविमर्शः

आत्यन्तिकतया दुःखान्निवृत्त्याऽऽत्यन्तिकं सुखम् ।
मोक्ष इत्युच्यते यस्मात्परं किञ्चिन्न विद्यते ।। ५२ ।।

सर्वथा सर्वदुःखेभ्यो मुक्तिर्मोक्ष इति स्मृतः ।
लेशतो दुःखमात्रेऽपि विद्यमाने न तद्भवः ।। ५३ ।।

आत्मैक्यवादिनामेतन्मतं भेदान्न भिद्यते ।
अन्यथाऽद्वैतसिद्धान्तभङ्गापत्तिः प्रसज्यते ।। ५४ ।।

औपाधिकस्य भेदस्य विद्यमानतयाऽप्यसौ ।
तल्लयात्पूर्णभावाच्च मोक्षावस्था विशिष्यते ।। ५५ ।।

किञ्चिद्दुःखे सुखप्रेक्षा प्रेक्षकाणां न युज्यते ।
प्रकाशप्रसरादीषत्तमोभावो यथा तथा ।। ५६ ।।

स्वातन्त्र्याद् दुःखराहित्यादेकान्तश्रयणादपि ।
भेदाभावादथात्मैक्यात्तत्सत्त्वान्मुक्तिरिष्यते ।। ५७ ।।

आत्मानात्मभिदो भाने चिदचित्परिकल्पने ।
परमात्मात्मनोश्चैक्ये मुक्तिस्स्यात्प्रत्यभिज्ञया ।। ५८ ।।

न प्रियाप्रिययोः स्पर्शो नापि लेशस्तयोः खलु ।
निषेधात्सर्वभावानां कैवल्यमिति मन्यते ।। ५९ ।।

वस्तुतो नामभेदाच्च स्वार्थभेदो वितन्यते ।
स्पर्शास्पर्शादयो भावा विनश्यन्ति परावधौ ।। ६० ।।

सोऽहमित्येव यद्ध्यानं तन्मुक्तेर्मार्ग उच्यते ।
तत्प्रत्ययोपरोधाच्च तत्प्राप्तौ बाध इष्यते ।। ६१ ।।

सर्वात्मैक्ये परां काष्ठां प्राप्ते किं स्विद् विनश्यति ।
तदभोक्तृतयाऽत्यन्तं दुःखनाशः श्रुतौ स्मृतः ।। ६२ ।।

सर्वमात्मैव चावृत्य सर्वतः सम्प्रतिष्ठते ।
सर्वथा तन्मयीभावादभोक्तृत्वं निसर्गतः ॥ ६३ ॥

आत्मनो नाप्यचैतन्याज्जडत्वात्प्रस्तरोपमा ।
अभोक्तृत्वमसङ्गत्वं निर्लेपत्वं च तत्क्रमात् ॥ ६४ ॥

मोक्षावस्थागता काचिद् विशिष्टा दुःखनिष्कृतिः ।
तत्सम्भूत्या परावाप्तिर्या सैषा मुक्तिरुत्तमा ॥ ६५ ॥

ज्ञानं चैतन्यमित्याहुर्ज्ञानी चेतन उच्यते ।
बद्धावस्थस्य जीवस्य ज्ञानं भवति दुःखदम् ॥ ६६ ॥

सुखदुःखानुभूतिश्च ततो नापैति सर्वथा ।
मुक्तावस्थस्य तज्ज्ञानगुणोऽपि प्रविलीयते ॥ ६७ ॥

श्रुतिसम्मतसर्वात्मदृष्टेरैक्यं प्रशस्यते ।
तत्तात्पर्यात्समस्तत्वादात्मैव प्रतिपाद्यते ॥ ६८ ॥

किं पश्येत् ? किन्नु जानीयात् ? दृष्टिज्ञानभिदा कुतः ।
तदभावप्रभानत्वे तत्सद्भावकथा वृथा ॥ ६९ ॥

जडत्वान्नैतदुक्तं स्यात् सर्वात्मत्वात्प्रयुज्यते ।
दर्शनज्ञानभावादेरभावप्रतिबोधनात् ॥ ७० ॥

यदा संदर्शनादीनां साधनानां विनाशनम् ।
तदा नो तत्प्रयुक्तत्वात् साध्यज्ञानादिभावना ॥ ७१ ॥

एवं मोक्षस्वरूपस्य संक्षेपाद् वर्णनं कृतम् ।
विस्तरादग्रतो वक्ष्ये तत्तद्दर्शनभेदतः ॥ ७२ ॥

अथ मोक्षसाधनविमर्शः

मोक्षप्राप्तेस्तु किं तावत्साधनं प्राहुरुत्तमम् ? ।
तत्र किं किं मतं ? तस्य विचारोऽयं प्रवर्तते ।। ७२ ।।

तस्य साधनजिज्ञासा तत्स्वरूपनिबन्धिनी ।
तत्र दुःखनिवृत्त्यात्मप्रकारः परिकल्पितः ।। ७३ ।।

प्रायोऽभिमतसिद्धान्ताद् दुःखलेशपरिक्षयः ।
तद्द्वारा सौख्यसम्प्राप्तिप्रकाशः प्रणिधीयते ।। ७४ ।।

दुःखसंवेदनस्यापि नाशात्तद्धेतुनाशनम् ।
मूले नष्टे कुतश्शाखा-न्यायादेतत्प्रशस्यते ।। ७५ ।।

परिहारेण चैकस्य वस्तुनो दुःखरूपिणः ।
ततोऽन्यच्चाप्यपेक्षातो महद् दुःखं प्रयच्छति ।। ७६ ।।

तस्य रूपपरिज्ञानात् तन्नाशे मूलतः कृते ।
तदुत्पत्तिभिया नासौ मुमुक्षुर्भीतिमृच्छति ।। ७७ ।।

अप्रियस्य च संसर्गाद् दुःखमायाति नैकशः ।
तद्धानादपरप्राप्त्या वृद्धिरेतस्य वस्तुनः ।। ७८ ।।

किं मूलमिति निश्चित्या निर्वक्तुं तत्तु दुःशकम् ।
ज्ञाते तस्मिंस्तु तन्नाशं कर्तुमुत्कण्ठते जनः ।। ७९ ।।

यदेकस्य कृते दुःखं तदेवान्यस्य सौख्यदम् ।
सौख्यमेतद् यदेकस्य तदेवान्यस्य चाप्रियम् ।। ८० ।।

इत्येवं संशयाल्लोको मुह्यति भ्रममाश्रितः ।
उपादानात्मको हेतुस्सर्वत्र समदुःखदः ।। ८१ ।।

नैव दुःखसुखप्रेप्सा हेतुज्ञानाद् विभागशः ।
विधातुं शक्यते नूनं पदार्था अव्यवस्थिताः ।। ८२ ।।

जडस्य चेतनस्यापि वस्तुनो मूलमेव यत् ।
तत्तत्त्वमुच्यते रूपाद् रूपभावः पृथङ् मतः ॥ ८३ ॥

यज्ज्ञानस्योपयोगित्वं मोक्षप्राप्तौ निरूप्यते ।
तत्तत्त्वमाहुराचार्या बिन्दुसत्त्वमिवाम्बुनः ॥ ८४ ॥

जडस्यैकं पृथक् तत्त्वं चेतनस्य च तत्पृथक् ।
मूलहेतुतया द्वित्वात्तत्त्वमेतद् विभिद्यते ॥ ८५ ॥

स्थूलमावेक्ष्य सूक्ष्मस्य हेतुज्ञानं प्रजायते ।
विशेषादथ सामान्यं मूर्ताच्चामूर्तमिष्यते ॥ ८६ ॥

कार्यात् तत्कारणेच्छाया उत्पत्तिस्स्यात्स्वभावतः ।
कार्यकारणभावाच्च प्रपञ्चस्स्थूलरूपभाक् ॥ ८७ ॥

एष सृष्टिक्रमः प्रोक्तः श्रुतिस्तत्र प्रमात्मिका ।
वर्णनीयतया तस्य प्रकारो नैकभेदवान् ॥ ८८ ॥

ज्ञानसौकर्यतस्तस्य नानारूपपरिक्रिया ।
गुल्मस्तम्बावलम्बेन दृष्टान्तप्रतिविम्बनम् ॥ ८९ ॥

एकमेव मुखं नैकोपमानैरुपमीयते ।
तत्त्वमेकं प्रकाराणां भेदाद् भिन्नमिव स्थितम् ॥ ९० ॥

एकवाक्यतया तस्य श्रुतिप्रोक्तस्य वस्तुनः ।
तत्त्वमित्येव सद्भावः पृथग्भावस्तु नामतः ॥ ९१ ॥

सृष्टिक्रम-विमर्शः

पृथ्वी जलं ततस्तेजो वायुराकाश इत्यथ ।
शब्दस्स्पर्शस्तथा रूपं रसो गन्धश्च तद्गुणाः ।। ९२ ।।

तन्मात्र-पञ्चकं चैतत्सूक्ष्मरूपांशतस्थितम् ।
श्रोत्रत्वङ्नेत्ररसनाघ्राणैस्तद्ग्रहणक्रिया ।। ९३ ।।

प्रेरणान्मननादेषां मन एकमतीन्द्रियम् ।
वाक्पाणिपादपायूपस्थेत्येतत्पञ्चकं पृथक् ।। ९४ ।।

प्राणो बुद्धिरहङ्कारश्चात्माऽव्यक्तः पुमानिति ।
इन्द्रियाणाममीषां चाध्यक्षत्वे तत्त्वपञ्चकम् ।। ९५ ।।

एष सृष्टिक्रमः प्रोक्तस्तत्र शास्त्रं निदर्शनम् ।
कार्यकारणसद्भावप्रमाणात्प्रमितिक्रिया ।। ९६ ।।

तत्र पारम्परी काचिच्चिरादेषा प्रवर्तिता ।
सृष्टिरित्यभिधानाऽसौ परमात्मप्रकाशिनी ।। ९७ ।।

सर्वस्य मूलमेवास्य साक्षात्कारः परात्मनः ।
कार्यकारणसंदृष्टेरभिप्रायात् प्रकीर्तितः ।। ९८ ।।

परापरतया सर्वे भावास्तत्र निरूपिताः ।
एकज्ञानात्तदन्यस्य ज्ञानमुत्पद्यते स्वतः ।। ९९ ।।

विषयज्ञानतो ज्ञानं मनसस्तेन बुद्धिजम् ।
उत्तरोत्तरविज्ञानात् तत्त्वज्ञानं प्रकाशते ।। १०० ।।

सर्वान्तस्स्थः परो भावस्सूक्ष्मरूपात् प्रतिष्ठितः ।
तज्ज्ञानादेव जीवस्य सार्थक्यं जन्मनो भवेत् ।। १०१ ।।

वेदान्तविदुषामेतन्मतं शास्त्रानुमोदितम् ।
तत्त्वमस्यादिवाक्यानां सारमाहुर्मनीषिणः ।। १०२ ।।

आत्मसाक्षात्कृतेः के केह्युपायास्सन्ति सम्मताः ? ।
तत्र नानाप्रकारेण मार्गभेदा निरूपिताः ॥ १०३ ॥

कार्याणां च समस्तानां कारणं सूक्ष्ममुच्यते ।
तत्र सूक्ष्मतमं तत्त्वं परमात्मेति गीयते ॥ १०४ ॥

कस्यचिच्च श्रुतेस्तावत्साहाय्यादात्मदर्शनम् ।
याथार्थ्यात् तत्स्वरूपस्य 'नेति' 'नेति' निरूपणम् ॥ १०५ ॥

निषेधान्नेतिशब्देन श्रुतिर्मौनमिवाश्रिता ।
विधानान्न प्रवर्तन्ते चक्षुर्वागिन्द्रियक्रियाः ॥ १०६ ॥

पदार्थानां प्रबोधाय परात्मप्रतिविम्बनम् ।
सम्यग्बोधे तु वेदोऽपि तत्रावेदायते स्वयम् ॥ १०७ ॥

मुख्यतस्तु निषेधात्मा शब्दस्तत्र प्रयुज्यते ।
तस्माद् भिन्नं विनिर्दिश्य पुनस्तत्प्रतिषिध्यते ॥ १०८ ॥

दुर्बोधस्यापि बोधाय प्रयत्नोऽयं श्रुतेर्महान् ।
ब्रह्मभावाय कल्पन्ते वस्तूनि सकलान्यपि ॥ १०९ ॥

श्रुतेरुद्देश्यमेवैतत्, सामान्या ब्रह्मभावना ।
प्रतिवस्तुप्रभेदेन व्याप्नोति द्रागशेषतः ॥ ११० ॥

वस्तुतो जगतो भावः परमार्थप्रकाशकः ।
समुत्प्रेरणया सैषा श्रुतेतस्त्र प्रवर्तना ॥ १११ ॥

मातेव स्नेहभावेन श्रुतिस्तत्र प्रवर्तते ।
अन्नप्राणमनोबुद्धिष्वमुष्याः प्रेरणं क्रमात् ॥ ११२ ॥

वचनामृतपानाय तत्तत्त्वाधिगमाय च ।
निर्भयं कृतकार्यं च लोकमापाद्यते श्रुतिः ॥ ११३ ॥

अधिकारिप्रभेदेन तत्र मार्गाः प्रवर्तिताः ।
ब्रह्मसाक्षात्कृतौ भूयो वाचोऽपि प्रतिपादिताः ॥ ११४ ॥

प्रणवादिकमन्त्राणां जपकर्मविधानतः ।
प्रतिमाराधनोपायस्तत्त्वसाक्षात्कृतेः कृते ॥ ११५ ॥

प्रतिष्ठा जगतो यत्र शाश्वतीयं निर्दर्शिता ।
तत्र प्रायोवचोवादप्रवृत्त्या श्रुतिरुन्मुखी ।। ११६ ।।

परमात्मप्रकाशस्य प्रतिबन्धकता यतः ।
आवश्यकतया मुक्तिस्ततस्स्याद् विषयादितः ।। ११७ ।।

प्राणस्य मनसश्चापि साक्षात्कार्येऽधिकारिता ।
तयोर्ब्रह्मपरो भावो विधातव्योऽधिकारिणा ।। ११८ ।।

अनन्या ब्रह्मनिष्ठाऽसौ प्रमादप्रतिरोधतः ।
ब्रह्मजिज्ञासुना कार्याऽधिकारप्राप्तचेतसा ।। ११९ ।।

परमात्मा तदात्मीयं मत्वा तं पश्यति स्वयम् ।
सैव साक्षात्कृतिस्सैव ब्रह्मणस्स्वीकृतिः परा ।। १२० ।।

एष मोक्षोऽभिमन्तव्यस्सर्वतः प्रतिवेदनात् ।
कायेन मनसा वाचा तत्त्वापत्त्यैव सद्गतिः ।। १२१ ।।

श्रौतदर्शनतात्पर्यात् प्रोक्तमेतन्मतं मया ।
तेन तत्त्वद्वयं सिद्धं द्रष्टृदृश्यप्रभेदतः ।। १२२ ।।

चैतन्यं द्रष्टृभावेन ज्ञानरूपेण तिष्ठति ।
तदन्यद् दृश्यमित्याहुस्सर्वमेतज्जडात्मकम् ।। १२३ ।।

पञ्चभूताश्च तन्मात्रा इन्द्रियाणि दशेति च ।
बुद्ध्यहङ्कारचित्तादिप्राणाव्यक्तादयश्च ते ।। १२४ ।।

दृश्यवर्गो व्यपेक्षातस्तत्त्वतो व्यपदिश्यते ।
प्रत्यक्षाच्छब्दतस्तत्रानुमानाच्च प्रवर्तना ।। १२५ ।।

व्यक्त्या व्यक्तिरभिव्यक्त्याऽभिव्यक्तिश्चेति सम्मतम् ।
प्रमाणप्रमितिप्रेक्षाविधानात्तत्त्वनिश्चयः ।। १२६ ।।

द्रष्टव्यः प्रथमं चात्मा श्रोतव्यस्तदनु स्वतः ।
मन्तव्यश्चाभितस्सोऽयं ततोऽभिव्यक्तिरात्मनः ।। १२७ ।।

क्रमशः क्रमिका भावा उत्पद्यन्ते विशेषतः ।
सामान्यात्तत्प्रहाणाच्च विज्ञानादेकभावना ।। १२८ ।।

मूलभूतस्य तत्त्वस्य ब्रह्मेत्याख्यस्य सर्वतः ।
साक्षात्कारोऽभिमन्तव्यस्तन्मयीभावभावितः ॥ १२९ ॥

श्रवणं मननं चैवं निदिध्यासनमात्मनः ।
प्राप्त्युपायप्रकारोऽयं तत्र नाना निर्दशितः ॥ १३० ॥

दर्शनाच्छ्रवणं हेयं श्रवणाद् दर्शनक्रिया ।
दीपदृष्ट्याऽन्धकारस्य नाशवत्तत्र हेतुता ॥ १३१ ॥

परोक्षं शब्दजं ज्ञानमपरोक्षं तु दर्शनम् ।
तेन तस्यानुबन्धित्वाद् द्वयं तत्रोपयोगि तत् ॥ १३२ ॥

प्रकृतस्यानुरोधेन ह्यात्मश्रवणमात्रतः ।
नो कृतार्थो भवेज्जीवस्तत्र प्रत्यक्षतो गतिः ॥ १३३ ॥

श्रवणान्मननं श्रेयस्ततस्तत्त्वानुदर्शनम् ।
दर्शनादात्मनो व्यक्तिस्तया मुक्तिर्भवेद्ध्रुवम् ॥ १३४ ॥

मननं चानुमानं चोभयं तत्र सहायकम् ।
शब्दो ज्यायानभिप्रेतः प्रत्ययोपनिबन्धनात् ॥ १३५ ॥

रागद्वेषाभिभूतानां प्राणिनां भावनावशात् ।
तदेकं तत्त्वमप्यत्र प्रभिन्नमिव भासते ॥ १३६ ॥

मृत्स्नापिण्डेन निर्माणं प्रतिमानामनेकधा ।
देवमानवदैत्यानां पृथग्बुद्ध्या विवर्तनम् ॥ १३७ ॥

मृत्तत्त्वं मूलतस्तत्र कारणान्वेषणे कृते ।
यथैकं भेदभागेवं तथैवैतद् विवर्तते ॥ १३८ ॥

शुद्धाम्बुबिन्दुवत् कूपसरित्स्रोतोह्रदाब्धिषु ।
भेदाभासाद् विपर्यासात्तदेकं प्रविभेदवत् ॥ १३९ ॥

अनन्तानन्तसंख्यातः कारणानां परम्परा ।
तत्र यन्मूलहेतुत्वादतीतं तत्परात्मकम् ॥ १४० ॥

न प्रियं नाप्रियं किञ्चिन्नो रागद्वेषविप्लवः ।
सम्बन्धो बन्ध इत्याहुस्तत्त्यागाच्छान्तिभावना ॥ १४१ ॥

चित्तवृत्तेर्निरोधाय मुदपेक्षा महात्मनाम् ।
तदुपायादनात्मत्वप्रभावः परिशिष्यते ॥ १४२ ॥

परमात्मप्रकाशेन मुक्तात्मा सम्प्रकाशते ।
तयोरैक्यादशेषेण प्रभेदः प्रविलीयते ॥ १४३ ॥

मुक्त्याप्तिश्चात्मनस्साक्षात्कृतेरेवाभिजायते ।
साधनं किञ्चिदत्रान्यन्नोपयोगि प्रसज्यते ॥ १४४ ॥

तदपेक्षानिषेधाच्च श्रुतिस्तत्र प्रवर्तते ।
आत्मरूपपरिज्ञानादमृतत्वाय कल्पते ॥ १४५ ॥

नाभिभूतेषु भूतेषु स्वात्मानं योऽभिपश्यति ।
स परब्रह्मभावेन भावितो भासतेतराम् ॥ १४६ ॥

यज्ञदानतपःकर्मप्रधानैस्साधनैरपि ।
तमेतं ज्ञातुमिच्छन्ति यतयश्छिन्नसंशयाः ॥ १४७ ॥

सद्यो मुक्तात्मनां मार्गस्स एष प्रतिपादितः ।
क्रमेणाप्यस्य जीवस्य गतिस्तत्र निरूपिता ॥ १४८ ॥

पुनर्जन्मविमर्शः

प्रारब्धकर्मणो नाशादात्मविज्ञानभासनात् ।
परां काष्ठां गते तस्मिन् सद्यो मुक्तिर्महात्मनाम् ।। १४९ ।।

तदभावात्क्रमादेव प्रवृत्तिस्तत्र देहिनाम् ।
पुनर्जन्म पुनर्मृत्युरित्येव क्रम उच्यते ।। १५० ।।

कर्मणां फलभोगाय पुनर्जन्म प्रजायते ।
तदन्ते मृत्युरुद्दामो, ज्ञानान्मुक्तिः परा श्रुतिः ।। १५१ ।।

जातिर्जन्म पुनर्जातिः पुनर्जन्मेति निर्वचः ।
ततो रूपं ततो नाम तदुपाधिः प्रकीर्त्यते ।। १५२ ।।

जातिरूपाभिधानानामुपाधीनां ग्रहाग्रहौ ।
जन्ममृत्यूपसंज्ञानाद् भूयो भूयोऽभिकल्पितौ ।। १५३ ।।

शब्दतश्चानुमानाच्च पुनर्जन्म प्रसिद्धयति ।
प्रत्यक्षादप्यर्थतस्य सिद्धिर्नैव विरुद्धयति ।। १५४ ।।

उच्चनिम्नकुलोत्पत्तेः प्रभुक्तेस्सुखदुःखयोः ।
पुण्यपापानुरोधाच्च पुनर्जन्मात्र सिद्धयति ।। १५५ ।।

वैषम्यात्कर्मणो भोगाद् विधानात्पुण्यपापयोः ।
देहाद् देहान्तरज्ञानात् पुनर्जन्म प्रकल्पते ।। १५६ ।।

ऋते कर्मान्यथाभावाद् भोगश्चेत् सुखदुःखयोः ।
अकृताभ्यागमो हेतोर्विना कार्यं प्रसज्यते ।। १५७ ।।

इष्टसाधनताज्ञानात्प्रवृत्तिः प्राणिनां मता ।
तत्प्रणाशात्ततो मुक्तिः पुनर्भावाय युज्यते ।। १५८ ।।

दर्शनेषु च सर्वेषु पुनर्जन्म प्रतिष्ठितम् ।
चार्वाकः केवलं तत्र प्रतीपं प्रतिभाषते ।। १५९ ।।

सूक्ष्मलिङ्गविमर्शः

सूक्ष्मलिङ्गशरीरस्य सत्त्वं तत्राभिमन्यते ।
स्थूलाभावेऽपि तस्य स्यादुपायात्कार्यकारिता ॥ १६० ॥

पदार्थैस्सप्तदशभिः प्राणबुद्धीन्द्रियादिभिः ।
सूक्ष्मलिङ्गस्य निर्माणं शास्त्रेषु परिकीर्तितम् ॥ १६१ ॥

अविद्या कारणं तत्र प्रकृतिर्वेति नामतः ।
सूक्ष्मं लिङ्गं तथा हेतुशरीरश्चेति तद्भिदाः ॥ १६२ ॥

कार्याभावेऽपि तद्धेतोस्सत्ता सिद्धान्तसम्मता ।
तत्पूर्वं विद्यमानत्वात्तदभावेऽपि तिष्ठति ॥ १६३ ॥

स्थूलेन वपुषा यच्च शुभाशुभफलात्मकम् ।
क्रियते कर्म तस्यायं संस्कारस्सूक्ष्मवर्ष्मणि ॥ १६४ ॥

कर्मजन्याभिसंस्काराज्जीवात्मा पूर्वदेहतः ।
देहान्तरमवाप्नोति सेयं लोकस्य विक्रिया ॥ १६५ ॥

सुषुप्तेरनुभूत्याऽपि सुखमस्वाप्समित्यथ ।
स्थूलदेहादृते ह्यन्यत्सूक्ष्ममित्यनुमीयते ॥ १६६ ॥

स्थूले वपुषि संसुप्ते भूतेन्द्रियमनोमयम् ।
सूक्ष्मं तन्नैककार्येषु भ्रमद् भोगान् समश्नुते ॥ १६७ ॥

पञ्चाग्निविद्यया देवपितृयानानुमार्गतः ।
देहान्तरगतिस्तस्य जीवस्येति प्रकीर्त्यते ॥ १६८ ॥

न चेयं कल्पनामात्रप्रसूता तद्गतिक्रिया ।
याथातथ्येन सम्प्रोक्ता श्रुतिप्रामाण्यवादिभिः ॥ १६९ ॥

समुद्राज्जलबिन्दूनामाहृतिस्सूर्यरश्मिभिः ।
अर्चिषो मार्गतो यानं प्रत्यक्षं नावलोक्यते ॥ १७० ॥

अदृश्याकर्षणं तत्र सामर्थ्यात्तत्स्वभावजम् ।
येन सम्पद्यते सर्वं विज्ञानादवसीयते ॥ १७१ ॥

केवलान्मरणान्मुक्तिर्नैव शास्त्रानुमोदिता ।
आत्मसाक्षात्कृतिस्तस्या उपायः प्रणिधीयते ॥ १७२ ॥

तत्रोपासनया भाव्यं साध्यसाधनयाऽनया ।
दुर्ज्ञेयस्यात्मनस्साक्षात्क्रिया तस्यां प्रतिष्ठिता ॥ १७३ ॥

सैवेयं भावना भूम्ना ब्रह्मभावाय भाविता ।
चेष्टया सम्प्रवृत्तिस्स्यान्मनोवाक्कायकर्मणाम् ॥ १७४ ॥

"मनो ब्रह्मेत्युपासीत" श्रौताद्वाक्यात्पदे पदे ।
तन्महत्त्वमभिख्यातं भावनाख्या ह्युपासना ॥ १७५ ॥

प्रसिद्धे वस्तुनि प्रायः प्राणिमात्रस्य भावना ।
साधारण्यान्मनस्तत्र तदेतत्प्रागुपास्यते ॥ १७६ ॥

राजसन्दर्शनात्पूर्वं तद्भृत्याराधना यथा ।
ब्रह्मसाक्षात्कृतेः प्राक् सा तथा चित्ताद्युपासना ॥ १७७ ॥

प्राणिमात्रे मनो ह्येतत्प्रसारं प्रतिपद्यते ।
वस्त्वन्तरगतिस्तस्याविसम्वादेन सिद्ध्यति ॥ १७८ ॥

शरीरादपि सौकर्याद् वचनं सम्प्रवर्तते ।
ततोऽपि प्रसभं चैतन्मनो व्याप्नोति वस्तुषु ॥ १७९ ॥

तस्मात्तस्य परिज्ञानं ब्रह्मज्ञानस्य साधनम् ।
परमात्मस्वरूपेण यतस्तत् परिकल्पते ॥ १८० ॥

सामान्यज्ञानमापाद्य विशेषं परिचक्षते ।
वस्तुना वस्तुनिर्देशात्तत्परं तत्त्वमिष्यते ॥ १८१ ॥

प्रतीकोपासना सेयं सर्वत्र श्रुतिषु स्मृता ।
तत्त्वज्ञानाय लोकानां प्रवृत्तिस्तत्र भूयसी ॥ १८२ ॥

प्रतीकं समुपादाय शास्त्रवादः प्रवर्तते ।
तत्र नूनं भवत्यन्ते तत्त्वबोधोऽपि तद्विदाम् ॥ १८३ ॥

कृतेऽपि बहुशो वादे विद्वाँस्तत्र न मुह्यति ।
पामराणां मतिर्भ्रान्त्या विदुषामुत्तमा गतिः ॥ १८४ ॥

जीवात्म-विमर्शः

शरीरोपाधिनाऽऽविष्टो जीवात्माऽयं निगद्यते ।
ततस्तस्याभिसंज्ञानादस्याभिज्ञानमुच्यते ॥ १८५ ॥

मानसोपाधिसंछन्नः परमात्मा प्रकाशते ।
उपाधेयानुसन्धाने ह्युपाधिः पर्युपास्यते ॥ १८६ ॥

शरीरत्वे मनस्त्वे च तद्विशेषणता मता ।
विशेष्यत्वं तयोरत्र जीवात्मपरमात्मनोः ॥ १८७ ॥

उपाध्युपाधेयतया सम्बन्धोऽप्यनयोरयम् ।
सम्बन्धिज्ञानतः पूर्वं सम्बन्धज्ञानमिष्यते ॥ १८८ ॥

उपाध्युपासना सेयं शास्त्रेष्वभिमतोदिता ।
अत्रोपास्यस्य तत्त्वस्य प्राधान्यं ध्रुवमक्षतम् ॥ १८९ ॥

मनोमयः प्राणशरीरवानयं
परात्मभावेन विवृत्तिमागतः ।
उपाधिसंछन्नतया समन्ततो
न वेत्ति तं विज्ञजनोऽपि तत्त्वतः ॥ १९० ॥

अथ तृतीयः परामर्शः

वेदान्तवचनोन्नीता प्रतीकोपाध्युपासना ।
सत्यं ज्ञानमनन्ताख्यं तया ब्रह्माधिगम्यते ॥ १९१ ॥

त्रिकालाबाध्यरूपेण सत्यमित्यभिधीयते ।
चिदात्मत्वेन तज्ज्ञानमनन्तञ्चानियत्तया ॥ १९२ ॥

भावनोन्नीयमानस्य सदसद्भूचामशेषतः ।
स्वरूपं लक्ष्यते तस्य सेयं सम्यगुपासना ॥ १९३ ॥

वस्तुवस्तुप्रभेदेन तदेव प्रतिपद्यते ।
बिन्दुबिन्दुवितानेन समिद्धं सागराम्बुवत् ॥ १९४ ॥

प्रत्यक्षं दृश्यमानं यत् पृथिव्यादिकभौतिकम् ।
कार्यकारणसम्बन्धात्तदेतत्तत्र लीयते ॥ १९५ ॥

स्वेन रूपेण तच्चान्ते स्वयमेवावशिष्यते ।
श्रुतौ श्रद्धानिबद्धानामालयस्थानमेव तत् ॥ १९६ ॥

येषां नो तत्र विश्वासस्तेषामन्यपथस्स्मृतः ।
अनुमानादिनाऽप्येतत्प्रमाणेनाभिपद्यते ॥ १९७ ॥

अनुभाव्यं तदेवात्रानुमानात्करणादपि ।
कार्यात्तत्कारणज्ञानात्कारणात्कार्यबोधनात् ॥ १९८ ॥

अन्यथाबोधवादेन प्रवृत्तानामयं विधिः ।
सर्वथा नो विपर्येति तत्त्वज्ञानस्पृशा दृशा ॥ १९९ ॥

यदेवानुमितिप्रोक्तं तदेव श्रुतिबोधितम् ।
तत्त्वमेकं द्विकं वास्तु त्रिकं वा मार्गभेदतः ॥ २०० ॥

अस्ति नास्तीति वाङ्मात्राद् विधानाद्वा निषेधनात् ।
तदेवोच्चीयते चान्ते तत्त्वतश्चावशेषणात् ॥ २०१ ॥

ब्रह्म वास्त्वन्यनाम्ना वा विवर्तेत प्रकामतः ।
द्वैताद्वैतविशिष्टत्वाच्छून्यत्वादपि तत्तथा ॥ २०२ ॥

यद् वा तद् वा भवेदेतन्नामभेदात्पृथक्पृथक् ।
तत्त्ववादानुरोधेन तदानन्त्यान्न दूषणम् ॥ २०३ ॥

श्रोतव्यत्वेन मन्तव्यस्तत्त्वमस्यादिवाक्यतः ।
द्रष्टव्यत्वादशेषेण प्रत्यगात्मा प्रतीयते ॥ २०४ ॥

तत्र मानं श्रुतिर्वास्यादनुमानं भवेदुत ।
प्रत्यक्षमपरोक्षं वा त्वस्ति नास्तीति वास्त्वलम् ॥ २०५ ॥

येन केनापि मार्गेण साधनेन मतेन वा ।
तदेवोन्नीयते तत्त्वं चिन्मयं शाश्वतं शिवम् ॥ २०६ ॥

कार्यमात्मानुरूपेण कारणस्यानुमापकम् ।
कारणं तदपेक्षातोऽपरिच्छिन्नं चिदन्वितम् ॥ २०७ ॥

मृद्भाण्डं कार्यमाश्लिष्य मृदात्मा हेतुरित्ययम् ।
चेतनाधिष्ठितः कार्योत्पत्तिनाशप्रयोजकः ॥ २०८ ॥

सापेक्षनित्यतावान् यः कार्यात्पूर्वान्तसत्त्ववान् ।
छिद्यमानो न यस्स्वेन स हेतुश्चेतनाश्रितः ॥ २०९ ॥

यदेतन्निखिलं दृश्यं समन्तात्पाञ्चभौतिकम् ।
प्रपञ्चेत्यभिधोन्नीतं कार्यजातं जगत्त्रयम् ॥ २१० ॥

तस्य केनापि नित्येनापरिच्छिन्नेन विश्वतः ।
व्यापकेन सता नूनं भवितव्यं च हेतुना ॥ २११ ॥

यश्च हेतुतया कश्चित्परार्थस्सम्प्रतीयते ।
स नित्यश्चेतनः कार्यापरिच्छिन्नश्च सिद्ध्यति ॥ २१२ ॥

विश्वराडेक एवासौ विश्वात्मा विश्वविश्रुतः ।
सृष्टिस्थितिलयस्थानं स एव जगतां यतः ॥ २१४ ॥

अनन्तानन्तभेदेन तदाख्यानं वितन्यते ।
वस्तुतस्तत्त्वमेकं तद् दर्शनानां समन्वयात् ॥ २१५ ॥

एकमेकमनेकं स्यादनेकादेकमेव तत् ।
ततश्शून्यमनिर्वाच्यमद्वैतादिप्रभेदभाक् ॥ २१६ ॥

नैके न्यायाः प्रवर्तन्ते नैके वादाश्च वादिनाम् ।
पक्षेष्वथ विपक्षेषु वस्तुतस्तु समन्वयः ॥ २१७ ॥

न गूढं नापि चागूढं गूढागूढतया स्थितम् ।
किञ्चिद् दृश्यमदृश्यं च सामान्यं सविशेषकम् ॥ २१८ ॥

एकमेवान्यथाभावाद् विपर्यस्तमनेकधा ।
वचोभङ्ग्याऽन्यया तत्र प्रवादा उद्भवन्त्यमी ॥ २१९ ॥

श्रुतिस्तत्रानुमानाय कार्यकारणभावतः ।
पर्यवस्यत्यभिप्रायाद् विशिष्यास्मिन् परात्मनि ॥ २२० ॥

तदर्थोऽयं क्वचिद् गूढः क्वचिच्चागूढ एव सः ।
संशयाद् दृष्टिभेदाच्च तत्र नानाविपर्ययः ॥ २२१ ॥

गूढार्थत्वान्न तात्पर्यं बुद्ध्यते श्रौतवाक्यतः ।
संशयात्मकप्रश्नानामनेकेषां समुद्भवात् ॥ २२२ ॥

किं तत्त्वं किन्नु तद्रूपं ? केन मानेन सिद्ध्यति ? ।
कति मानानि ? किं तेषु तत्त्वबोधाय कल्पते ? ॥ २२३ ॥

प्रबलं दुर्बलं किन्नु ? स्वतो वा परतश्च किं ? ।
पौरुषेयोऽथवा चान्यो वेदोऽयं शब्दसम्भृतः ? ॥ २२४ ॥

नित्यो वाऽनित्य एवायं शब्दो वेदार्थनिर्भरः ? ।
तत्र कस्य प्रमाणस्य मुख्यता कस्य गौणता ? ॥ २२५ ॥

तेन यच्चेतनं बोध्यं तदेकं वाऽप्यनेककम् ? ।
निर्गुणस्सगुणो वाऽयं परात्मा परमेश्वरः ? ॥ २२६ ॥

जीवोऽप्येको ह्यनेको वा ? नित्योऽनित्योऽथवाऽप्ययम् ? ।
अणुर्वा मध्यमो वाऽयं विभुर्वा चेतनो जडः ? ॥ २२७ ॥

कर्तृताऽकर्तृता वाऽस्य ? भोक्तृताऽभोक्तृताऽथवा ? ।
अचेतनानां वस्तूनां किं मूलं कारणं ननु ? ॥ २२८ ॥

आत्मशक्तिप्रधानाऽसौ प्रकृतिः काऽस्ति कीदृशी ?।
त्र्यणूनां द्व्यणुकानां वाप्यणूनां तत्र का क्रिया ?॥ २२९ ॥

चिद्भिन्नं तदभिन्नं वा ? किमचेतनतात्मकम् ?।
तन्मूलं किं तथाभूतमाहोस्वित्किञ्चिदन्यथा ॥ २३० ॥

आरम्भः परिणामश्च विवर्तश्चेति च क्रमात्।
सत्कार्यो वाप्यसत्कार्यो वादाश्शास्त्रेष्वनेकधा ॥ २३१ ॥

न्याय्यः कस्तेषु वादेषु ? को वा सच्छास्त्रसम्मतः ?।
दिक्कालव्योमतमसां तत्त्वान्तरगतिर्न वा ?॥ २३२ ॥

कार्यतः परिणामोऽयं ? स्वभावाद्वा ? निमित्ततः ?।
कार्यं तत्कारणाद् भिन्नमभिन्नं वाऽभिपद्यते ?॥ २३३ ॥

परात्मा तदुपादानं ? निमित्तं ? वोभयात्मकः ?।
सापेक्षं तस्य कर्तृत्वं निरपेक्षं तदस्ति वा ?॥ २३४ ॥

अचेतनतया यच्च तत्सद्वाऽप्यसदस्ति वा ?।
सत्त्वे तत्सुस्थिरं वाऽस्तु क्षणिकं वाऽस्तु रूपतः ?॥ २३५ ॥

आन्तरं वा बहिर्भूतं ? तद् द्वयात्मतयाऽथवा ?।
विनाशीत्यविनाशीति ? सान्वयं वा निरन्वयम् ?॥ २३६ ॥

अचित्तत्त्वेन चित्तत्त्वाभिसम्बन्धः कथं स्मृतः ?।
किं स्वरूपमिदं ज्ञानं ? द्रव्यं वा तद्गुणात्मकम् ?॥ २३७ ॥

साकारं वा निराकारं ? केन रूपेण तिष्ठति ?।
ज्ञानमत्र च या ख्यातिः कीदृशी सा स्वरूपतः ॥ २३८ ॥

को मोक्ष ? स्तस्य किं रूपं ? को नु तं सम्प्रयच्छति ?।
बुद्धिवैशद्यमाधातुं संशयास्सन्त्यनेकशः ॥ २३९ ॥

कस्य किं स्यादभिप्रेतं ? मतं तत्र पृथक् पृथक्।
दर्शनानां मिथोवादाद् वर्णितं वक्ष्यतेऽग्रतः ॥ २४० ॥

अतलस्पर्शिगाम्भीर्याद् दर्शनागाधसागरः।
स्वल्पबुद्धिमतामेष दुर्विगाह्योऽवगाहने ॥ २४१ ॥

मतभेदेन सर्वेषां पदार्थानां निरूपणम् ।
प्रमाणात्तत्प्रमेयस्य सिद्धिरित्यवसीयते ॥ २४२ ॥

तत्र पूर्वं प्रमाणान्तर्मतभेदो निरूप्यते ।
यतस्तेन प्रमेयं तत्स्वतस्स्फीतं प्रकाशते ॥ २४३ ॥

प्रमाणविषये चार्वाकमतविमर्शः

चार्वाकाभिमतं तत्र यथार्थज्ञानसाधकम् ।
प्रत्यक्षं चैकमेवैतद् वस्तुतत्त्वावधारणे ॥ २४४ ॥

ज्ञानं यच्चेन्द्रियोद्भूतं यथार्थं वस्तुतस्तु तत् ।
नातिरिक्ततया तस्मात्किञ्चिदन्यत्सदर्थकम् ॥ २४५ ॥

श्रोत्रेन्द्रियस्य विषयादाप्तोक्तवचनेष्वपि ।
प्रामाण्यं शब्दमात्रस्य न चार्थस्य पृथक्तया ॥ २४६ ॥

येनेन्द्रियेण यश्शब्दो गृह्यमाणस्स्वरूपतः ।
स्वतस्स्वग्राहकत्वेन पर्यवस्येन्न चार्थतः ॥ २४७ ॥

अभिप्रायाद् यथार्थोक्तिराप्तवाक्यस्य सम्भवेत् ।
यथार्थैवेति सा नेति प्रत्येतव्यं प्रमाणतः ॥ २४८ ॥

सुन्दरी कामिनी तत्रेत्युक्त्या सम्भाव्यते हि सा ।
किन्त्ववश्यं न निश्चेतुं शक्यमेतदगोचरात् ॥ २४९ ॥

इन्द्रियेणाभिसम्बन्धात्पदार्थप्रतिपत्परा ।
प्रत्यक्षीकरणादेव प्रमाणं ह्येकमेव तत् ॥ २५० ॥

नानुमानं भवेन्मानं व्याप्तिज्ञानप्रदूषणात् ।
साध्यसाधनयोरेतत्साहचर्यं विरुद्ध्यति ॥ २५१ ॥

नेन्द्रियेणाभिसम्बन्धस्तत्र सर्वत्र जायते ।
वर्तमानेऽपि धूमाग्न्योस्साहचर्यं न सिद्ध्यति ॥ २५२ ॥

अतीतेऽनागते तस्य कुतस्सिद्धिर्भवेन्ननु ।
सम्बन्धाभावतस्तत्र व्यभिचारः प्रसज्यते ॥ २५३ ॥

अतीतेऽग्निं विना धूमोऽनागतेऽपि तथा भवेत् ।
व्यभिचाराभिशङ्केयं कथं वा केन वार्यते ? ॥ २५४ ॥

व्यभिचाराभिशङ्कायास्सत्त्वे नो व्याप्ति-निश्चयः ।
साहचर्यानुरोधेन तदुक्तेस्तु वचोऽन्यथा ॥ २५५ ॥

धूमाग्निव्याप्तिबोधोऽयं प्रत्यक्षं सकलात्मना ।
ततस्तस्यानुमानेन तदीयश्चेद् विनिश्चयः ? ॥ २५६ ॥

इत्येवं प्रोच्यमानेऽपि व्याप्तिबोधः प्रबाध्यते ।
तदर्थं व्याप्तिरन्या स्यादनवस्थेति दूषणात् ॥ २५७ ॥

उभयस्योभयार्थत्वे स्यादन्योन्याश्रयस्तयोः ।
ततो नैवानुमानं स्यात्प्रमाणमिति निश्चितम् ॥ २५८ ॥

शङ्कितव्याप्तिबोधेन शङ्कितानुमितिक्रिया ।
सम्भवेद् वा न वा तस्मान्नानुमानं यथार्थकम् ॥ २५९ ॥

प्रत्यक्षैकप्रमाणस्याभिमन्ताऽऽध्यक्षिकाह्वयः ।
चार्वाको विश्रुतो लोके तदध्यक्षीकृतं जगत् ॥ २६० ॥

उपमानादिकस्यापि प्रामाण्यं नाभिमन्यते ।
प्रत्यक्षादतिरिक्तं यन्न तस्यास्तित्वमिष्यते ॥ २६१ ॥

सिद्धान्तिमतविमर्शः

प्रत्यक्षीकारसाकारप्रकारेण प्रकामतः ।
यदध्यक्षीकृतं तत्त्वं तदेवैकं परार्थकम् ॥ २६२ ॥

येन तर्केण नैवात्रानुमानं साध्यते ततः ।
तत्र तर्कानुकूलं किं प्रमाणं परिकल्प्यते ॥ २६३ ॥

तदभावादभावेन तत्सत्त्वे तस्य सत्तया ।
अन्वयव्यतिरेकाभ्यां व्याप्तिसिद्धिर्विभाव्यते ॥ २६४ ॥

अग्निसत्त्वे यथा धूमो तदभावे न सोऽन्यथा ।
ततोऽग्निः कारणं तत्र धूमस्तत्कार्यमुच्यते ॥ २६५ ॥

धूमदर्शनतोऽग्नेस्स्यादनुमानं स्वभावतः ।
कारणादन्यथा कार्यं नेति सिद्धान्तिनां मतम् ॥ २६६ ॥

व्यभिचारग्रहाशङ्का हेतुहेतुमतोः कुतः ? ।
प्रत्यक्षत्वेऽपि तत्कुक्षौ व्याप्तिज्ञानं न वार्यते ॥ २६७ ॥

अतीतेऽनागते धूमे वह्नेस्स्याद् व्यभिचारिता ।
अतो व्याप्तिग्रहो नास्तीत्येवं शङ्कालवो वृथा ॥ २६८ ॥

प्रमाणाधीनमेवात्र ज्ञानमात्रं प्रमात्मकम् ।
केन मानेन तज्ज्ञानं भूतभाव्यग्निधूमयोः ॥ २६९ ॥

इन्द्रियायोगतस्तत्र प्रत्यक्षं नेति निश्चितम् ।
ततस्तत्रानुमानस्य प्रशक्तिस्सुतरां भवेत् ॥ २७० ॥

वस्तुतश्चक्षुरादीनामिन्द्रियाणां गतिस्स्वतः ।
बाध्यमाना विपर्येति तस्मिन् दृष्टे परावरे ॥ २७१ ॥

चार्वाकाभिमतन्यायात्तत्प्रकारपरिग्रहात् ।
सच्चिदात्मतया कश्चित्परार्थस्सम्प्रतीयते ॥ २७२ ॥

भौतिकस्य सुखस्यापि सतोऽज्ञानात्मकस्य च ।
भोक्तृत्वे ह्यात्मनस्सिद्धिरभोक्तृत्वे परात्मनः ॥ २७३ ॥

नामतः प्रोच्यमानं तत्किञ्चिदेवाभिधीयताम् ।
तत्त्वमेकमनेकं वा वस्तुतः परमार्थसत् ॥ २७४ ॥

नास्तिकास्तिकयोर्भेदस्तत्त्वतो नोपयुज्यते ।
शास्त्रवादप्रचारार्थं पृथग्भूतं मतं तयोः ॥ २७५ ॥

भौतिके वस्तुनि प्रेप्सां चार्वाकः कुरुते यतः ।
तदात्मत्वेऽपि तद्धानमन्ततः प्रतितिष्ठति ॥ २७६ ॥

प्रतिष्ठा जगतो येन यस्मिन्नेतत्प्रतिष्ठितम् ।
तन्निषेधेन तद्बोधः कथं केन निवार्यते ॥ २७७ ॥

चार्वाकदर्शनं यस्माद् विरुद्धं प्रतिपादयत् ।
यत्किञ्चित्साधयेदन्यत्तत्तदन्तः प्रतिष्ठते ॥ २७८ ॥

यथा वारिमुचा मुक्तं प्रावृडम्बु प्रवेगतः ।
प्रतीपं धारया गच्छत्सदन्तेऽब्धौ निलीयते ॥ २७९ ॥

प्रत्यक्षमानमात्रेण वस्तुतत्त्वं विचिन्वती ।
स्थूलतस्सूक्ष्ममाप्नोति चारुवाङ् नो वृथा मता ॥ २८० ॥

प्रमाणमतभेदविमर्शः

बौद्धदृष्ट्याऽनुमानं तत्प्रमाणं प्रतिपद्यते ।
शब्दोपमानयोस्तत्त्वं नेति मानद्वयं मतम् ।। २८१ ।।

प्रमत्तस्य प्रलापोऽपि शब्दत्वान्मानको भवेत् ।
आप्तोक्तवचनस्यापि प्रामाण्यं स्यादनन्तरम् ।। २८२ ।।

आदावनुमितिः पश्चात्तदधीनतया श्रुतिः ।
आप्तत्वेऽप्यन्यथा भावादनुमायाः प्रमाणता ।। २८३ ।।

प्रत्यक्षानुमितिभ्यां यः पदार्थस्सम्प्रसाध्यते ।
शब्दस्तं व्यञ्जयत्यन्ते प्रामाण्यं तस्य नो पृथक् ।। २८४ ।।

वैशेषिकमतेऽप्येतत्प्रमाणद्वयमास्थितम् ।
दृष्ट चैवानुमानञ्च पदार्थप्रतिपत्तये ।। २८५ ।।

प्रत्यक्षं शब्द इत्येवं माध्वमार्गानुयायिनः ।
श्रुत्यधीनाऽनुमाऽप्येषा तद्द्वयं तेऽभिमन्वते ।। २८६ ।।

स्वातन्त्र्येणानुमानस्य प्रामाण्यं न प्रसिद्ध्यति ।
श्रुतेस्साहाय्यतस्तस्य मानान्तरतया स्थितिः ।। २८७ ।।

विशिष्टाद्वैतवादेन प्रमाणत्रयमिष्यते ।
दृष्टं चैवानुमानञ्च शब्दश्चेति क्रमेण तत् ।। २८८ ।।

नैकमन्यव्यपेक्षातो वस्तुबोधे प्रवर्तते ।
स्वातन्त्र्येण गतिस्तेषां त्रयाणां साऽवधार्यते ।। २८९ ।।

सांख्येऽपि तद्वदेवैतन्मानत्रयमुदीर्यते ।
प्रत्यक्षमनुमानञ्च तथाप्तोक्तं वचः क्रमात् ।। २९० ।।

प्राञ्चो नैयायिकाश्चापि सांख्योक्तं मानकत्रयम् ।
मन्वते तद्वदेवैतत्प्रोवाच श्रीपतञ्जलिः ।। २९१ ।।

गौतमस्तूपमानेन सहैतत्स्याच्चतुष्टयम् ।
मतमास्थापयत्सूत्रादर्वाचीनास्तथादृशः ।। २९२ ।।

अर्थापत्त्या सहैतानि पञ्चेति गुरुसम्मतम् ।
भट्टः षट् तानि मनुतेऽनुपलब्ध्या युतान्यपि ॥ २९३ ॥

अद्वैतेऽपि तथैतानि षडिति प्रमितं ननु ।
सम्भवैतिह्यकत्वेनाष्टेति पौराणिकं मतम् ॥ २९४ ॥

चेष्टाऽप्येकं पृथङ्मानं तान्त्रिकाणां नये नव ।
एते संक्षेपतो वादाः प्रमाणप्रतिपत्तये ॥ २९५ ॥

संख्यामात्रोत्थवादोऽयं प्रमेयत्वे न तादृशः ।
अत्र प्रायो विसंवादो वस्तुतो नोपयुज्यते ॥ २९६ ॥

चार्वाको ह्येकमानत्वाद् ब्रुवाणस्सन्नपि स्वतः ।
एकत्वेऽद्वैततत्त्वान्तर्निष्ठवाक् सम्प्रतीयते ॥ २९७ ॥

साधनैकत्ववादेन साध्यमेकं तदात्मना ।
स्थूलदृष्ट्याऽपि तेनैतत्तत्त्वमद्वैतमीरितम् ॥ २९८ ॥

स्वयमेवान्यथा ह्येष मन्वानोऽप्यन्यमार्गतः ।
तदेवाभिदधात्यन्ते स्वतो जानातु वा न वा ॥ २९९ ॥

अज्ञानेनापि चेत्किञ्चिद् विचित्रं तेन भण्यते ।
तद्विरुद्धं प्रभासेत तत्त्वतस्तत्तु सान्वयम् ॥ ३०० ॥

वचो निर्युक्तिकं भूयो यथा बालो ब्रुवन्नपि ।
तदुक्त्या चेष्टितं तस्य बुद्ध्वा मात्रा न वार्यते ॥ ३०१ ॥

सर्वसमन्वयविमर्शः

तथैवैषामपि प्रायो विरोधिवचसामिदम् ।
चार्वाकप्रभृतीनाञ्च तदुक्तं नो वचोऽन्यथा ।। ३०२ ।।

ईश्वरः परलोकश्च तर्कद्वारेण तार्किकैः ।
साध्यते तत्र नान्येषां विरोधः परिदृश्यते ।। ३०३ ।।

निषेधादपि चार्वाकस्तदेवान्तेऽभिपद्यते ।
नेति-नेति श्रुतिप्रोक्तवचोऽभिप्रायवत्स नः ।। ३०४ ।।

केऽपि शब्दात्प्रवर्तन्ते केचिदन्येऽनुमानतः ।
अर्थापत्त्यादिभिः केचित्तद् धिपश्यन्ति चिन्मयम् ।। ३०५ ।।

प्रमेयरूपिणी वस्तु-सत्ता सर्वत्र सुस्थिरा ।
साधनेषु प्रभूतेषु सत्सु नासौ विकार्यते ।। ३०६ ।।

शुष्कवाग्वाद एवायं तात्पर्यान्नावधार्यते ।
तत्त्वमात्रावबोधाय चेष्टमाना मनस्विनः ।। ३०७ ।।

मूलसूत्रकृतस्तत्र व्यासप्रभृतयोऽप्यमी ।
प्रमाणत्वेन नो किञ्चित्सूत्रयाञ्चक्रुरेव ते ।। ३०८ ।।

साधनानि पृथक् प्राहुर्न साध्यं पृथगन्वितम् ।
येन केन पथा गच्छन् गङ्गाम्भस्स्नानमाचरेत् ।। ३०९ ।।

तद्वदेकं परं तत्त्वं सर्वशास्त्रानुमोदितम् ।
तदङ्गीकरणोपायाः प्रभिन्नास्सन्तु किन्नु तैः ।। ३१० ।।

लघीयः किञ्चिदप्येकं वस्तु व्याकरणेन तत् ।
अङ्गाङ्गिभावसम्बन्धादानन्त्यं याति रूपतः ।। ३११ ।।

अनन्तस्यापि तस्यान्ते सम्बन्धेऽस्मिन् प्रहापिते ।
आत्मनैक्यं समासाद्य तदानन्त्यं विनश्यति ।। ३१२ ।।

चिन्मयं चिद्घनं ह्येकं किञ्चिदेतदनुत्तमम् ।
वाक्चेतश्चक्षुरादीनामिन्द्रियाणामगोचरम् ।। ३१३ ।।

न कश्चिद् यत्र सम्बन्धो यतोऽन्यन्नाभिकल्प्यते ।
चित्तवृत्तेः प्रहाणाच्च तत्प्रमिण्वन्ति केऽपि ते ।। ३१४ ।।

प्रमाणसम्बन्धविमर्शः

सम्बन्धांश्चतुरस्तत्र प्रमाणानां वितन्वते ।
प्राणदश्चोपजीव्यश्च ग्राहकः पार्षदश्च ते ॥ ३१५ ॥

प्रमाणान्तरमादाय प्रामाण्यं यस्य तिष्ठति ।
तस्य तत्प्राणदं प्राहुस्स्वेतरप्राणदानतः ॥ ३१६ ॥

यदाश्रित्य च यत्स्वस्मात्प्रामाण्यादुपजीवति ।
तदेतदुपजीव्यं स्यादाश्रयाश्रयिभावतः ॥ ३१७ ॥

प्रामाण्यज्ञानतो यस्योपलब्धावपि साधनात् ।
अनुगृह्णाति साहाय्यात्तस्यानुग्राहकं हि तत् ॥ ३१८ ॥

प्रामाण्ये सुस्थिरेऽप्यस्य साधने सत्यपि स्वतः ।
विशिष्टविषयज्ञानेऽनुगामित्वेन पार्षदम् ॥ ३१९ ॥

अनुमानं श्रुतेः प्राणप्रदं न्यायविदां मतम् ।
श्रुतिस्तस्य तथाभूतं मानं श्रौताभिसम्मतम् ॥ ३२० ॥

स्मृतेः प्रमाणभूतायाः श्रुतिः प्राणप्रदा मता ।
तदर्थैस्सम्प्रणीतत्वात्स्मृत्यर्थानां यथार्थता ॥ ३२१ ॥

प्रत्यक्षाधीनता तत्र तदन्येषां तदाश्रयात् ।
तदेकं स्वेतरेषां चोपजीव्यत्वेन संस्थितम् ॥ ३२२ ॥

अनुमानादिकं सर्वं तदाश्रित्योपजीवति ।
यथाऽऽलोकेन लोकानां प्रवृत्तिः परिचीयते ॥ ३२३ ॥

आत्मा मन्तव्य इत्येवं श्रुतिरात्मप्रबोधिका ।
यन्मानत्वादनुग्राह्यमनुमानं प्रवर्तते ॥ ३२४ ॥

श्रौतं वाक्यमथास्यापि ततोऽनुग्राहकं मतम् ।
शाब्दज्ञानानुबन्धित्वात्संसारस्थितिरुच्यते ॥ ३२५ ॥

श्रुतेरग्रेसरत्वेनानुमानं तत्र पार्षदम् ।
अचिन्त्यात्मानुबोधाय यतस्तस्यानुगामिता ॥ ३२६ ॥

विशिष्टविषये क्वापि स्वातन्त्र्येणोभयक्रिया ।
श्रुतेर्वाऽनुमितेर्वाऽस्तु यदृच्छातः प्रवर्तना ॥ ३२७ ॥

नाग्रगामि ततः श्रौतं वाक्यं प्रामाण्यमृच्छति ।
नानुगामि भवेन्मानमनुमानञ्च तत्तथा ॥ ३२८ ॥

प्रत्यक्षादनुशब्दस्य बुभुत्सा सूपयुज्यते ।
मौनित्वेऽपि च तद्ध्यानं हार्दमेवानुभावकम् ॥ ३२९ ॥

स्फुटत्यर्थः कुतश्चिच्चेत्प्रतीतिपथमाविशेत् ।
तत्र शाब्दी गतिर्नूनमित्याहुश्शाब्दतान्त्रिकाः ॥ ३३० ॥

केनचिच्चेन्द्रियेणात्र यत्किञ्चित्परिगृह्यते ।
ध्वन्यमानतया तत्र वर्णानां स्फोटनक्रिया ॥ ३३१ ॥

संहृतक्रमरूपेण वर्णसंकलनादथ ।
तदर्थप्रतिपत्तिस्स्यात्प्रत्यक्षेणेतरेण वा ॥ ३३२ ॥

नित्यानित्यतया तत्र शब्दे वादो वृथायते ।
तत्त्वतो नित्यता तस्य तदन्यत्वे त्वनित्यता ॥ ३३३ ॥

सत्सदित्यनुवागुक्तेस्सदेकमवशिष्यते ।
असदेवेति, नैवेतीत्युक्त्याऽप्यन्ते सदिष्यते ॥ ३३४ ॥

भावाभावाभिरूपाणां पदार्थानामशेषतः ।
न भावो नाप्यभावस्स्याद्द्वयोर्द्वित्वं प्रणश्यति ॥ ३३५ ॥

एकत्वेऽप्यनुहारित्वादद्वैतं बिन्दुमात्रकम् ।
बिन्दुः प्रकृतिमापन्नश्शून्यमप्यनुभावयेत् ॥ ३३६ ॥

अनिर्वाच्यतयाऽप्यस्य वाच्यता वागनुश्रयात् ।
तद्व्यपाश्रयणादन्ते वाच्यावाच्यत्वधीर्मुधा ॥ ३३७ ॥

नामरूपाभिसम्बन्धस्तदन्वाख्यार्थमिष्यते ।
तत्प्रहाणादनिर्व्यूढं चिन्मात्रं किञ्चिदन्ततः ॥ ३३८ ।

सर्वशास्त्रेषु तात्पर्यात्तदेकं तत्त्वमुच्चितम् ।
दर्शनानां गतिस्तत्र लोकानाञ्च प्रतिष्ठते ॥ ३३९ ॥

बाध्यबाधकभावविमर्शः

बाध्यबाधकभावोऽपि प्रमाणेषूपजायते ।
मिथस्तेषु विरुद्धेषु एकेनान्यत्प्रबाध्यते ।। ३४० ।।

कस्मिँश्चिद् विषये यत्र युगपत्स्यात्क्रिया द्वयोः ।
तत्र ते संनिपत्योभे बलाबलतयाऽर्हतः ।। ३४१ ।।

आप्तोक्तं बाधकं क्वापि प्रत्यक्षस्य प्रकर्षणात् ।
दृष्टेनापि च तद्बाधस्सामर्थ्यातिशयात्क्वचित् ।। ३४२ ।।

प्रत्यक्षेणानुमानस्यानुमानेनापि तस्य च ।
बाध्यता दृश्यते क्वापि तयोरेवं विपर्ययः ।। ३४३ ।।

अन्यथासिद्धभावेन बाध्यत्वं परिकल्प्यते ।
दोषदर्शनतस्तेषामन्योन्यक्षतिरक्रमात् ।। ३४४ ।।

इन्द्रियाद्युपघातोत्थदूषणात्तदुपक्षयः ।
स्वतस्तेषां न बाध्यत्वं बाधकत्वं न चेत्यपि ।। ३४५ ।।

अद्यत्वे व्यवहारेण प्रमाणत्रयमुम्भितम् ।
प्रत्यक्षं चानुमानञ्च शब्दश्चेति प्रधानतः ।। ३४६ ।।

त्रिष्वेवान्तर्भवन्त्यत्र तान्युक्तान्यखिलान्यपि ।
बाध्यबाधकता तत्र शक्त्यशक्तिकृता मता ।। ३४७ ।।

तुल्यत्वे तूभयोर्बाधस्तदन्यस्योपयोगिता ।
तथात्वं यौगपद्येऽपि सुस्थितिः केवलात्मना ।। ३४८ ।।

प्रत्यक्षापेक्षया प्रायोऽन्येषामेषां कनिष्ठता ।
लोकयात्रा यतो ह्येषा दृष्टिसृष्टिनिबन्धना ।। ३४९ ।।

दर्शनेषु प्रभिन्नेषु प्रमाणेष्वपि संभिदाः ।
तेषु तैर्यत्प्रमातव्यं तत्तथैवोपपादितम् ।। ३५० ।।

विस्तरेण मिथो वादास्तेषूद्गच्छन्ति भूयसा ।
संक्षिप्यान्तेऽवशेषेण तदेकं तत्त्वमुह्यते ।। ३५१ ।।

प्रमेयं साध्यमेकं तत्प्रमाणैस्साधनैरपि ।
सत्सु तेषु प्रभूतेषु दर्शनानां पृथग्विधिः ।। ३५२ ।।

न कस्माचित्प्रमाणाच्च किञ्चिद् वस्तूपजायते ।
पूर्वसिद्धस्य तस्यैव स्वरूपं तेन बुध्यते ।। ३५३ ।।

वस्तुनिष्ठप्रकाराणां बोधनात्प्रमितिक्रिया ।
तत्र मानोपयोगस्स्यात्साध्यसाधनतान्वयात् ।। ३५४ ।।

प्रमेय-विमर्शः

प्रमाणैस्साध्यते यत्तु प्रमेयं तत्प्रमीयते।
चेतनाचेतनत्वेन तस्य द्वैविध्यमुच्यते॥ ३५५॥

प्राधान्यं चेतनस्यात्र तदन्यस्याप्रधानता।
यतश्चेतनताधीनं जगतोऽस्य विचेष्टितम्॥ ३५६॥

परमात्मेति जीवात्मेत्येवं तच्चेतनं द्विधा।
जीवात्मापेक्षया तत्र प्राधान्यं परमात्मनः॥ ३५७॥

तज्ज्ञानार्थं हि जीवोऽयं सर्वथा यत्ननिर्भरः।
आसंसारपरीहारावधेस्सेयं परिक्रिया॥ ३५८॥

सन्ततं ब्रह्मभावाय जीवेनात्मा समर्प्यते।
प्रमाणातीतमेवैतत्प्रामाण्यस्योपजीव्यकम्॥ ३५९॥

कारणानां समग्राणां मूलं तत्कारणं परम्।
तस्मादुत्पद्यते विश्वं तत्रैव प्रविलीयते॥ ३६०॥

तस्यैव सत्तया तेषां प्रमाणानां प्रमाणता।
सूर्यचन्द्राग्नयस्सर्वे प्रभासन्ते तदर्चिषा॥ ३६१॥

न प्रमाणगतिस्तत्र न चान्यत्तत्प्रमापकम्।
सर्वप्राणप्रदत्वेन स्वतस्तत्परिनिष्ठितम्॥ ३६२॥

प्रमाणातीतसत्त्वेऽपि तस्य सिद्धिर्न बाध्यते।
यतस्तेषां प्रमाणानामसिद्धिस्तदसिद्धितः॥ ३६३॥

प्रमाणाविषयत्वेऽपि स्वतस्तस्य प्रकाशता।
तत्कारणतया सर्वप्रपञ्चप्रतिभोदयः॥ ३६४॥

निर्गुणं निर्विशेषं च तत्रादौ ब्रह्म मूलतः।
भौतिकस्सकलः पश्चात्प्रपञ्चो विषयीभवेत्॥ ३६५॥

एकमन्यव्यपेक्षातः प्रमाणं चेत्प्रसाध्यते ।
तदा तत्रानवस्था स्याद् यया मूलं विनश्यति ।। ३६६ ।।

प्रमाणं स्वेतरापेक्षां विनैवात्मप्रकाशकम् ।
स्वतः प्रामाण्यबोधाय प्रकारोऽयं प्रकल्पितः ।। ३६७ ।।

स्वतः प्रमाणं प्रत्यक्षं तत्रैकान्तेन सम्मतम् ।
नानुमानादिना तस्य प्रामाण्यं साध्यते क्वचित् ।। ३६८ ।।

स्वतस्सिद्धस्य नान्येन पुनस्सिद्धिर्विधीयते ।
सिद्ध्यसिद्ध्योस्समाकारा प्रमाणस्य स्वतो गतिः ।। ३६९ ।।

शब्दानुमानयोः प्रायो गतिः प्रत्यक्षतो भवेत् ।
अदृष्टार्थेषु शब्दस्तु स्वतः प्रामाण्यमृच्छति ।। ३७० ।।

स्वतो वा परतो वास्तु प्रमाणप्रतिवेदनम् ।
प्रामाण्यं तत्वतश्चैकं नो पृथक्त्वाय कल्पते ।। ३७१ ।।

लोकव्यवहृतिस्तेन स्वयं ब्रह्माधिगम्यते ।
स हि प्राणप्रदो धर्मो येन प्रामाण्यमक्षतम् ।। ३७२ ।।

प्रमाणविषयत्वेन न तद्ब्रह्म प्रसिद्ध्यति ।
अनन्तानन्तमानानामालयस्थानमेव तत् ।। ३७३ ।।

अद्वैतात्मप्रकाशेऽस्मिन् त्रिपुटी प्रविलीयते ।
प्रमातृत्वं प्रमेयत्वञ्चेति द्वैतं न तिष्ठति ।। ३७४ ।।

प्रमाणस्य प्रमाणत्वं प्रमातुश्च प्रमातृता ।
प्रमेयस्य प्रमेयत्वं त्रिपुटीति प्रकीर्त्यते ।। ३७५ ।।

प्रमातृत्वं प्रमेयत्वं द्वयञ्चेत्प्रविलीयते ।
साक्षात्कारस्तदाऽद्वैतानुभूतेस्सम्भवेत्कुतः ? ।। ३७६ ।।

प्रत्यक्षानुभवो नाम साक्षात्कारोऽभिधीयते ।
स प्रमेयप्रमातृत्वानुबन्धादेव सिद्ध्यति ।। ३७७ ।।

तदभावात्तदुत्पत्तिश्शशशृङ्गोपमायते ।
तदेष त्रिपुटीनाशप्रकाशः कीदृगुद्भवेत् ? ।। ३७८ ।।

द्वैतसाक्षात्कृतेर्यत्तु सर्वथाऽभावभावनम् ।
तदेवाद्वैततत्त्वान्तः प्रकाशो दर्शनात्मकः ॥ ३७९ ॥

द्वैतनाशे स्वतोऽद्वैतप्रकाशः प्रतिभासते ।
तदवस्था-परीतस्य नान्यत्वज्ञानमाविशेत् ॥ ३८० ॥

नान्यत्सन्दर्शनन्तत्र नान्यज्ज्ञानं तदात्मनि ।
नान्यतः श्रवणं किञ्चित्स वै भूमा परावधिः ॥ ३८१ ॥

मूलतो भेदभावानां निवृत्त्या स प्रकाशते ।
अद्वैतात्मानुभूतीनां परा भूस्सैव भूतये ॥ ३८२ ॥

द्वैतभानाद् विनश्यन्ती विभान्ती तदभावतः ।
एकमेवानुपश्यन्ती चिदेषा परमार्थिनी ॥ ३८३ ॥

त्रिपुटीप्रलयादत्र द्रष्टृदर्शनयोर्लयः ।
अन्यानुभवसम्भानं न किञ्चिदवशिष्यते ॥ ३८४ ॥

प्रमाणविषयत्वेऽपि ब्रह्मणो नापरा क्रिया ।
पूर्वावस्थानुसम्प्राप्तिपर्यन्तं तत्प्रमाणदृक् ॥ ३८५ ॥

तदव्यवहिते काले साक्षात्कारः परात्मनः ।
तत्रैष त्रिपुटीनाशः प्रामाण्यञ्चापि निष्फलम् ॥ ३८६ ॥

अद्वैतवादिनामेतन्मतं संक्षिप्य कीर्तितम् ।
द्वैतवादस्तु तद्भिन्नस्तत्प्रकारः प्रदर्श्यते ॥ ३८७ ॥

प्रत्यक्षाद् द्वैतसम्भानं श्रुतेश्चाद्वैतभावना ।
पूर्वं भेदार्थकं तत्रापराऽभेदानुबन्धिनी ॥ ३८८ ॥

एकत्वे चोभयोस्तावद्विरोधोऽयं प्रतीयते ।
एतयोर्यस्तु संवादप्रत्यययोऽसौ निरूप्यते ॥ ३८९ ॥

प्रमाणविषयत्वेन श्रुतेस्तत्र विरोधिता ।
अतो निर्विषया तस्य प्रतीतिरनपायिनी ॥ ३९० ॥

भेदाद् द्वैतमभेदाच्चाद्वैतमस्यात्मवस्तुनः ।
दृष्टिरन्यादृशी काचित्तयोस्तस्मिन् परात्मनि ॥ ३९१ ॥

जीवात्मनोः पृथग्भाव द्वैतापत्तिर्भवेन्ननु।
तयोरैक्ये तदद्वैतप्रबोधः श्रुतिसम्मतः ।। ३९२ ।।

द्वैताद्वैतगतिस्तत्र वस्तुतः प्रतिरोधिनी।
सोऽहमस्मीतिविज्ञाते चिन्मयीभाव एव सः ।। ३९३ ।।

तात्पर्यात्तत्परं तत्त्वं न वादवचनोचितम्।
ब्रह्मत्वेऽपीश्वरत्वेऽपि परात्मत्वेऽपि तत्तथा ।। ३९४ ।।

प्रमाणानां गतिस्तत्र सम्भवेत्सा यथा तथा।
प्रवृत्तिपरिणामेन निवृत्तेरुदयो ध्रुवम् ।। ३९५ ।।

निवृत्तेरुदयादेव तत्प्रकाशोऽभिभासते।
यथा घनघनाभावे व्योम्नि सा भास्करप्रभा ।। ३९६ ।।

भेदात्मकतया तत्राभेदज्ञानं कुतो नु तत्।
बलाबलतया पूर्वं तयोः कस्य गतिर्भवेत्? ।। ३९७ ।।

तत्र रामनुजाचार्यमतं भेदावबोधकम्।
द्वैतवादानुबन्धित्वात्तदेतत्प्रतिपाद्यते ।। ३९८ ।।

भेदाभेदात्मके नात्र बलाबलविचारणा।
बाध्यबाधकतायां हि तथात्वं परिकल्प्यते ।। ३९९ ।।

उभयस्योभयत्वेन प्रामाण्यं न प्रबाध्यते।
चिदचिद्बोधनात्तत्र द्वयोस्सार्थक्यमुच्यते ।। ४०० ।।

चिदचिद्वर्ग एषोऽत्र शरीरं परमात्मनः।
तद्विशिष्टः परात्माऽसावद्वितीयतया मतः ।। ४०१ ।।

एकत्वेऽभेदसंसृष्टिः श्रुतेस्तात्पर्यमिष्यते।
शरीरप्रविभगाय भेदश्चाप्युपचर्यते ।। ४०२ ।।

ऐक्यबोधाय तत्रेदं श्रुतेस्तात्पर्यमीदृशम्।
विशिष्टाद्वैतवादस्य मतमेतत्परिष्कृतम् ।। ४०३ ।।

शरीरत्वे शरीरित्वसम्बन्धः परमात्मनः।
चिदचिल्लक्षणो नैष प्रपञ्चस्तत्स्वरूपभाक् ।। ४०४

तत्त्वमेकं परिष्कृत्य प्रकारैः परिवर्तितम् ।
न चान्यादृशमस्तीदं केवलं वाचि दृग्भिदा ॥ ४०५ ॥

श्रुतेः प्रामाण्यमास्थाय तदेकं तत्त्वमुच्चितम् ।
तत्प्रतीपपथेनापि वस्तुसत्परिकल्पितम् ॥ ४०६ ॥

समन्वयतया तत्र तदेकस्यानुकार्यता ।
अनुकारप्रकाराणां प्रभेदेष्वैक्यदर्शनात् ॥ ४०७ ॥

श्रुत्यर्थानां विरोधेऽपि नाभिप्रायो विरुद्ध्यति ।
तदर्थानुभवादन्ते सोऽर्थ एव प्रतीयते ॥ ४०८ ॥

शङ्कराचार्यवर्यस्य मतं तद्भिन्नमुन्नतम् ।
तत्र तात्पर्यतोऽद्वैतं तत्त्वमेकं प्रकीर्तितम् ॥ ४०९ ॥

अङ्गाङ्गिभावसम्बन्धान्न चात्मैक्यं प्रतिष्ठितम् ।
न वा साक्षात्कृतेर्बाधस्तथात्वेनोपजायते ॥ ४१० ॥

विरुद्धभावनावृत्तेर्निवृत्तिस्सा परा स्थितिः ।
तत्र सर्वप्रमाणानां प्रवृत्तिः पर्यवस्यति ॥ ४११ ॥

तत्त्वमस्यादिवेदोक्तो महावाक्यसमुच्चयः ।
ब्रह्मजीवगतं चैक्यं संकेतयति सर्वतः ॥ ४१२ ॥

द्वैतप्रत्यक्षतोऽद्वैतप्रत्यक्षे कालभेदतः ।
अवस्थाद्यनुभावेन मिथो नैव विरोधिता ॥ ४१३ ॥

कालान्तरतया ह्येकं वस्तु भिन्नस्वरूपतः ।
भासमानं विरुद्धं नेत्येवं केचित् प्रचक्षते ॥ ४१४ ॥

प्रत्यक्षत्वे यदि द्वैतं सत्यमित्यभिधीयते ।
अद्वैतदर्शनापत्तिस्तदा कालान्तरेऽप्यसौ ॥ ४१५ ॥

अङ्गाङ्गित्वे विशिष्टत्वादात्मत्वाभावतोऽप्यथ ।
श्रुतिप्रोक्तं तदद्वैतप्रत्यक्षं सम्भवेत् कुतः ? ॥ ४१६ ॥

ततः प्रत्यक्षसंसिद्धं द्वैतमद्वैतमन्यतः ।
अनयोः पूर्वमाहार्यं प्रमाणाभासमेव तत् ॥ ४१७ ॥

वस्तुनो विषयत्वेन यस्य चारोपणं ततः ।
तदेव दोषमूलत्वाद् बाध्यमानं स्वरूपतः ॥ ४१८ ॥

आहार्यश्चाप्यनाहार्य आरोपो द्विविधो मतः ।
अनाहार्यतया यश्च स भ्रमः परिकीर्तितः ॥ ४१९ ॥

वस्तुनस्तत्र मिथ्यात्वं प्रमाणञ्चाप्रमाणकम् ।
आहार्यारोपतो भिन्ने तत्र नैतत्प्रदूषणम् ॥ ४२० ॥

स्वाधिष्ठाने य आरोपो न सोऽप्याहार्यतो मतः ।
गुणानां तत्र सादृश्यात्प्रमाणं तद्गतं वचः ॥ ४२१ ॥

यथार्थज्ञानमाहार्ये तदारोपे न नश्यति ।
तत्त्वाभावेन तद्बोधस्तद्गुणैरुपचारतः ॥ ४२२ ॥

न तादात्म्यं तयोर्मूलादारोप्यारोप्यमाणयोः ।
आतिशय्येन शौर्यादेर्गुणस्यैवानुबोधनम् ॥ ४२३ ॥

वक्तुः श्रोतुश्च यद्वाक्यं तदारोपात्प्रयुज्यते ।
गुणानुकीर्तनात्तस्य प्रामाण्यं न प्रहीयते ॥ ४२४ ॥

प्रत्यक्षेणाभिसंसिद्धं द्वैतं चेत्सत्यमिष्यते ।
श्रुतिप्रामाण्यतोऽद्वैतं तदाऽऽरोपितमेव तत् ॥ ४२५ ॥

यदि चाद्वैतमेवैतत्सत्यमित्यभिधीयते ।
तदा द्वैतसमारोपस्तत्रावश्यं विधीयते ॥ ४२६ ॥

सत्यासत्यतयाऽऽहार्यानाहार्यारोपभेदतः ।
श्रुतिप्रत्यक्षयोर्जाते विरोधे ज्यायसी श्रुतिः ॥ ४२७ ॥

न भ्रमात्मतया श्रौतं वाक्यमेकमपि स्थितम् ।
तत्प्रमाणदृशामेतन्मतमद्वैतवादिनाम् ॥ ४२८ ॥

प्राणिवर्गस्समग्रोऽपि स्वात्मनश्च परात्मनः ।
भेदमत्राभिमन्वानस्स्वकर्मस्वभिवर्तते ॥ ४२९ ॥

हठादेव तथाऽऽरोपे स्वीकृते लौकिकक्रिया ।
वस्तुतो नोपयुज्येत प्रत्यक्षेणाभिकल्पिता ॥ ४३० ॥

अयं शङ्कास्पदीभूतः पक्षः प्रस्तूयते यतः।
ततोऽद्वैतप्रतिष्ठायां श्रुतेः काचिद् विगर्हणा ॥ ४३१ ॥

श्रुतिप्रमाणता येषां नाभीष्टा वस्तुमूलतः।
तेषामेतद्वचो ह्युक्तं युक्तितो द्वैतवादिनाम् ॥ ४३२ ॥

श्रुत्यपेक्षाकृतं चेत्तत्प्रत्यक्षं बलवत्तरम्।
त्रिकालाबाधिते सत्ये तदन्यन्नाभिमन्यते ॥ ४३३ ॥

भविष्यद् भूतवृत्तं यद्वर्तमानमपि स्वतः।
प्रत्यक्षीकरणादेव सम्प्रसिद्ध्येदशेषतः ॥ ४३४ ॥

श्रुतेः पारं विपश्यन्तः प्रत्यक्षस्वच्छचक्षुषः।
तूष्णींभावाय कल्पन्ते शब्दज्ञानादृते हि ते ॥ ४३५ ॥

यदेतद् वागनुस्यूतं जगद् विपरिवर्तते।
तदस्यैतां विना किञ्चिन्न स्थास्नु व्यवहारतः ॥ ४३६ ॥

प्रत्यक्षं स्वेतरस्यात्रोपजीव्यत्वेन कल्पितम्।
प्रमाणान्तरतस्तस्य ततो बाधो न सम्भवः ॥ ४३७ ॥

प्रत्युतानेन चान्यानि प्रबाध्यन्ते पदे पदे।
दृष्टमानानुकूलत्वाल्लोकानां प्रक्रिया यतः ॥ ४३८ ॥

नोपजीव्यस्य संबाधो नापि तेनेतरस्य च।
बाध्यत्वे बाधकत्वे च प्रामाण्यं न द्वयोरपि ॥ ४३९ ॥

स्वोपजीवकसापेक्षमुपजीव्यं प्रवृत्तिमत्।
एकेनान्यस्य संबाधे तदभावः प्रसज्यते ॥ ४४० ॥

स्वरूपक्षतिरेव स्यान्मिथो बाधप्रकल्पनात्।
अविनाभावतो यस्माद् द्वयोस्सम्बन्ध इष्यते ॥ ४४१ ॥

यथा नियमसापेक्षं नियामकमनूद्यते।
तथोपजीवकाधीनमुपजीव्यं व्यवस्थितम् ॥ ४४२ ॥

न किञ्चित्केनचिद्बाध्यं नापि तद्बाधकं क्वचित्।
यतस्सर्वेषु भावेषु नोपजीव्यविरोधिता ॥ ४४३ ॥

प्रत्यक्षं नैकधा लोके व्यक्तिभेदेन भिद्यते ।
देशकालादिसम्भेदात्तदेकत्वं न युज्यते ॥ ४४४ ॥

चैत्रप्रत्यक्षतो भिन्नं मैत्रप्रत्यक्षमक्षतम् ।
वस्तुव्यक्तिसमस्तत्वात्तदानन्त्यं प्रजायते ॥ ४४५ ॥

प्रत्यक्षमेव नो चैकं तादृशं प्रतिपद्यते ।
अनुमानादिकास्सर्वाः प्रमाणव्यक्तयस्तथा ॥ ४४६ ॥

तदैकस्यान्यतो बाधस्सम्यगेवोपपद्यते ।
लोकेऽपि स्वोपजीव्यस्य विरोधः प्रविलोक्यते ॥ ४४७ ॥

किन्तु यस्य प्रमाणस्योपजीव्यं प्राणदं भवेत् ।
बाध्यबाधकभावोऽयं तयोर्नैवाभिजायते ॥ ४४८ ॥

तदनुग्राहकत्वेन नित्यसम्बन्धयोगिनोः ।
अविरोधाद् द्वयोर्नास्ति बाध्यबाधकभावना ॥ ४४९ ॥

शाब्दभानप्रवृत्तिस्तु श्रावणज्ञानतो मता ।
ततश्शाब्दोपजीव्यं तच्छ्रौतं प्रत्यक्षमिष्यते ॥ ४५० ॥

तत्त्वमस्यादिवेदोक्तवाक्येष्वैक्यं यदुच्यते ।
ज्ञातृज्ञेयतया भेदः श्रावणेऽप्यस्य बाध्यते ॥ ४५१ ॥

तथात्वे नोपजीव्यस्य विरोधस्सम्प्रधार्यते ।
नापि तत्त्वे प्रमाणत्वक्षतिरेवोपजायते ॥ ४५२ ॥

वाच्यवाचकसम्बन्धानुबन्धात्सम्प्रवर्तिताः ।
अप्येताः श्रुतयो भिन्ना न चात्मैक्यानुबोधनात् ॥ ४५३ ॥

प्रवर्तमानं परितो विरोधतः,
श्रुतेस्समग्रं किल वाक्यमद्भुतम् ।
जहाति भेदं पुनरत्र तत्त्वतः,
चिदात्मना चैक्यमनुश्रितं हि तत् ॥ ४५४ ॥

अथ चतुर्थः परामर्शः

प्रमातृतत्सम्बन्धादिविमर्शः

प्रमातृत्वात्प्रमाताऽपि प्रमेयान्नो पृथक्कृतः।
तत्सकाशान्न तद्धर्मः कदाचिद् व्यतिरिच्यते ॥ ४५५ ॥

जगतो मूलहेतुत्वात्कारणं चैकमेव तत्।
न तस्यान्वेषणं स्थूलात्प्रत्यक्षादुपपद्यते ॥ ४५६ ॥

इन्द्रियाणां गतिस्तत्र रुद्धा बुद्धिविपर्ययात्।
मुख्यतः श्रुतिरेवैषा स्वातन्त्र्येण प्रवर्तते ॥ २५७ ॥

श्रौतवादेन मूलत्वाच्छ्रुतिरेकाबलीयसी ।
यतस्तत्त्वानुसन्धानं ततोऽन्येन न सम्भवम् ॥ ४५८ ॥

उक्तमेतन्मतं येषां त एते वेदवादिनः।
प्रधानश्चैष सिद्धान्तो मतो वेदान्तिनामपि ॥ ४५९ ॥

परोक्षं जगतो मूलं यदेकं तत्त्वमुच्चितम्।
निश्चेतव्यतया तस्य श्रुतिरेव प्रसाधिका ॥ ४६० ॥

श्रुतिसिद्धोऽपि यश्चार्थो नानुमानेन साध्यते।
तत्रानुमितिरेवैषा दुष्टा सोऽर्थस्तु वस्तुसन् ॥ ४६१ ॥

अनुमानादिना किञ्चित्साध्यमानं पृथक्तया।
तदाभासतया तत्स्यादसत्यं श्रुत्यनुक्तवत् ॥ ४६२ ॥

तथैव श्रुतिपार्थक्यात्स्मृतेश्चाप्यप्रमाणता ।
तदर्थस्मरणादेव यतस्तस्या यथार्थता ॥ ४६३ ॥

शास्त्रेभ्यश्चाखिलेभ्योऽपि श्रुतिरभ्यर्हिता मता।
अक्षराम्नायमूलत्वात्तदर्थानुविधिः परः ॥ ४६४ ॥

न तर्केणाभियोक्तव्यो धर्मोऽयश्चागमादृते।
ऋषयोऽप्यागमार्थानां सम्यगेवानुयायिनः ॥ ४६५ ॥

शास्त्रयोनितया तद्वच्छब्दमूलतयाऽपि च ।
श्रुतेः प्रामाण्यमास्थाय श्रौतवादः प्रतिष्ठितः ॥ ४६६ ॥

अचिन्त्यब्रह्मणो ज्ञाने श्रुतिरेव प्रमात्मिका ।
तत्र तर्काप्रतिष्ठानाद् गतिस्तस्यावरुध्यते ॥ ४६७ ॥

परमार्थप्रतिष्ठायां हेतवो ये निरूपिताः ।
श्रुत्युक्तार्थप्रतीपत्वाद्धेत्वाभासा भवन्ति ते ॥ ४६८ ॥

जैमिनेः पाणिनेश्चैवं व्यासस्यैतन्मुनेर्मतम् ।
श्रौतदर्शनमार्गस्य प्रणेतारस्त्रयोऽप्यमी ॥ ४६९ ॥

अनुमानवादितार्किकमतविमर्शः

अनुसन्दधते ये तु तर्कैस्ते तार्किका मताः ।
मूलतत्त्वानुसन्धाने तर्कप्राधान्यवादिनः ॥ ४७० ॥

तर्क एवानुमानं तत्तदेवैकं प्रतिष्ठितम् ।
हेतुहेतुमतोर्भावादखिलं व्याप्नुते जगत् ॥ ४७१ ॥

श्रुतेः प्रामाण्यमप्येते मन्वाना मूलतार्किकाः ।
अनुमानानुविद्धत्वाच्छ्रौतवादान् वितन्वते ॥ ४७२ ॥

श्रुतेश्चानुमितेश्चापि विरोधो यत्र भासते ।
अनुमानानुरोधेन श्रुतिस्तत्र प्रमात्मिका ॥ ४७३ ॥

गौणार्थत्वेन सम्भिन्नः श्रुत्यर्थश्चानुमानतः ।
अर्थवादप्रधानत्वान्न व्याप्तिमनुविन्दति ॥ ४७४ ॥

निरङ्गत्वाद् यथाऽऽकाशं नित्यं सत् परमाणुवत् ।
न्यायवैशेषिकोपेतं श्रुत्यर्थान्नोपयुज्यते ॥ ४७५ ॥

आत्मनस्तस्यसम्भूतिरित्युक्तेस्तदनित्यता ।
सम्भूतिस्तदभिव्यक्तिरित्यर्थस्तार्किकैः कृतः ॥ ४७६ ॥

विरोधे तूभयोर्वाक्ये हेतुहेतुमतोः क्रमात् ।
सङ्गतिश्चानुसन्धातुं व्याप्तिमेव स्मरन्ति ते ॥ ४७७ ॥

प्रत्याभासादसौ भेदश्चेतनाचेतनोदितः ।
सृष्टेः प्राक्कालतस्तादृङ् नानात्वं तेऽभिमन्वते ॥ ४७८ ॥

आत्माधीनस्समग्रोऽपि प्रपञ्चोऽयं प्रतन्यते ।
अभेदप्रणिधानाच्च श्रुतेर्मुख्यार्थतोचिता ॥ ४७९ ॥

अनुमानानुकूलत्वाद् गौणार्थस्यापि मुख्यता ।
न्यायवैशेषिकैरिष्टा श्रुतिप्रामाण्यतोऽन्यथा ॥ ४८० ॥

जीवब्रह्मगतं चैक्यं यदज्ञातार्थबोधनात् ।
महावाक्येषु तद्भेदस्तार्किकैरनुमीयते ॥ ४८१ ॥

ऐकमत्येन नैतेषां तर्कवादः प्रतिष्ठितः ।
साधनानामनेकत्वात्साध्यानामप्यनेकता ॥ ४८२ ॥

श्रुतत्वात्सदृशत्वाच्च शरीरित्वाद् विकार्यतः ।
जीवब्रह्माभिसम्बन्धो नैकहेतुभिरुह्यते ॥ ४८३ ॥

अदृष्टवस्तुनस्सिद्धिर्वस्तुतः श्रुतिमन्तरा ।
तर्कमात्रेण नो कार्या, यतस्तर्कोऽप्रतिष्ठितः ॥ ४८४ ॥

कारणं जगतो मूलं न साध्यं सिद्धमेव तत् ।
अत्यन्तं सूक्ष्ममित्याहुः कापिलास्सांख्यवित्तमाः ॥ ४८५ ॥

नावकाशः प्रमाणानां साध्ये सिद्धे तु तद्गतिः ।
क्रियायाश्चाभिनिष्पत्तौ हेतुरप्यभिपद्यते ॥ ४८६ ॥

प्रत्यक्षं वर्तमानस्य न भूतस्य भविष्यतः ।
कार्यात्तत्कारणज्ञानमनुमानं यतस्स्मृतम् ॥ ४८७ ॥

यावत्कार्याभिसंसिद्धि नानुमानं प्रसिद्ध्यति ।
तथैवेन्द्रियसम्पर्कात्प्रत्यक्षं चापि युज्यते ॥ ४८८ ॥

जगतो मूलहेतोश्च सूक्ष्मत्वान्नात्र दृष्टता ।
तथाप्यनुमितेस्तत्र प्रसरो नैव वार्यते ॥ ४८९ ॥

कार्यं दृष्ट्वाऽनुरूपत्वात्कारणस्यापि निश्चयः ।
प्रसिद्धेर्लोकतश्चेयं संसिद्धाऽनुमितिक्रिया ॥ ४९० ॥

मूलतत्त्वानुबोधाय श्रुतिरप्यनुमानतः ।
प्रवृत्तिमयते यस्मात्ततस्तस्य प्रधानता ॥ ४९१ ॥

भूतं वा भौतिकं वा यत्कार्यं तस्यानुकूलतः ।
प्रकृतिर्जगतो मूलं कारणं त्रिगुणात्मिका ॥ ४९२ ॥

केवलेनानुमानेन यतस्सैषाऽनुमीयते ।
तत्र पक्षानुवृत्तित्वात्सांख्यास्तेऽप्यानुमानिकाः ॥ ४९३ ॥

प्रणेता योगसूत्राणां भगवान् स पतञ्जलिः ।
अनुमानानुगामित्वात्तार्किकस्सोऽपि कीर्त्यते ॥ ४९५ ॥

प्रधानं जगतो मूलं कारणं यत्प्रतिष्ठितम् ।
तर्कमात्रानुमेयं तन्न मानान्तरमिष्यते ॥ ४९६ ॥

शब्दप्रामाण्यमूलेषु श्रुतिस्मृत्यादिकेष्वपि ।
प्राधान्येन श्रुतेस्तत्र प्रमाणत्वं प्रतिष्ठते ॥ ४९७ ॥

ईश्वरोच्चारिता सैषा श्रुतिरित्यनुमीयते ।
तत्पूर्वं लोकवृत्तानां ज्ञानमप्यानुमानिकम् ॥ ४९८ ॥

प्रत्यक्षानुमितिभ्यां स ईश्वरस्सकलानपि ।
पदार्थाननुसन्धाय वेदार्थान् प्रतिपद्यते ॥ ४९९ ॥

प्रत्यक्षापेक्षयाऽप्येषा व्यापिकानुमितिक्रिया ।
ततो वेदस्समग्रोऽपि नानुमानात्पृथङ्मतः ॥ ५०० ॥

प्रसिद्धास्तार्किकास्तेऽमी गौतमाध्वानुयायिनः ।
प्रधानं साधनं तेषां तर्क एवेति मन्यते ॥ ५०१ ॥

मूलतत्त्वानुबोधायानुमानं प्राक् प्रकल्पते ।
तद्द्वारेण श्रुतेस्तत्र गतिः पश्चात्प्रतिष्ठिता ॥ ५०२ ॥

शब्दश्चैतिह्यमात्रेण निजार्थं प्रतिपादयन् ।
श्रोतॄणां श्रवणादेव न स स्वार्थेऽभिवर्तते ॥ ५०३ ॥

प्रत्यक्षं तदुदाहारं दृष्टान्तेनाभिदर्शयत् ।
अनुमानं तदर्थस्य सूक्ष्मतत्त्वानुमापकम् ॥ ५०४ ॥

मूलं यत्कारणं सूक्ष्मं झटित्येवानुमानतः ।
बुद्धौ तच्चावभासेत शब्दमात्रं न तादृशम् ॥ ५०५ ॥

किञ्च वैशेषिका नैते शब्दप्रामाण्यवादिनः ।
अनुमानानुगामित्वात्तार्किकास्तेऽपि सम्मताः ॥ ५०६ ॥

अप्रामाण्यं न शब्दस्य सोऽनुमानस्य साधनम् ।
तत्रान्तर्निष्ठता तस्य नो पृथक्त्वेन तद्गतिः ॥ ५०७ ॥

प्रमाणत्वेन यश्शब्दो नानुमानात्स वै पृथक् ।
तद्द्वारेणात्मनोऽर्थस्य सत्यत्वप्रतिपादनात् ॥ ५०८ ॥

प्रामाण्याभ्युपगन्तृत्वाच्छ्रुतेरास्तिक्यमिष्यते ।
तदभावात्तु नास्तिक्यं तर्कमात्रानुयायिनाम् ॥ ५०९ ॥

जैना बौद्धास्तथा चैते कापिला नास्तिका मताः ।
श्रुतिवाक्येषु नैतेषां यतः कश्चित्समादरः ॥ ५१० ॥

तार्किकेष्वास्तिकाः केचिन्नास्तिकाः केऽपि चापरे ।
श्रौतदार्शनिकेष्वेवं विभागो नोपपद्यते ॥ ५११ ॥

मिथः श्रुत्योर्द्वयोर्जाते विरोधे वाक्यभेदतः ।
गौणप्राधान्यसन्धानात् संगतिः प्रविधीयते ॥ ५१२ ॥

श्रुतेश्चानुमितेश्चापि मिथो यत्र विरोधिता ।
श्रौतानां तार्किकाणां च तत्र वादः प्रवर्तते ॥ ५१३ ॥

व्याप्त्यधीनतया तस्य साहचर्यानुरोधतः ।
प्रामाण्यमनुमानस्य परतः प्रतिपद्यते ॥ ५१४ ॥

स्वतः प्रमाणभूतायाः श्रुतेश्चापेक्षया हि तत् ।
अप्रधानमिति श्रौतं मतमेतद् व्यवस्थितम् ॥ ५१५ ॥

प्रामाण्यं परतो ये वा श्रुतेरप्यनुमन्वते ।
तार्किकास्तेऽनुमानस्य प्राधान्यं तन्मते स्थितम् ॥ ५१६ ॥

वेदस्यापौरुषेयत्वं येऽङ्गीकुर्वन्ति सर्वथा ।
श्रुतौ बद्धादरास्तेऽमी स्वतःप्रामाण्यवादिनः ॥ ५१७ ॥

पौरुषेयतया येषां मते वेदोऽयमिष्यते ।
प्रामाण्यं परतस्तस्य ते प्रमिण्वन्ति तार्किकाः ॥ ५१८ ॥

शब्दप्रयोक्तुराप्तस्याधीना शब्दप्रमाणता ।
आप्तो याथार्थ्यवादित्वादीश्वरः पुरुषस्स्मृतः ॥ ५१९ ॥

स एवाप्ततमश्चैको वेदे तत्कर्तृता यतः ।
तत्प्रामाण्यं ततस्सिद्धं परतश्चाप्तवादिनाम् ॥ ५२० ॥

कर्तृत्वे पौरुषेयत्वमकर्तृत्वे तदन्यथा ।
प्रकाशकतया तत्र तत्कर्तृत्वं विवक्षितम् ॥ ५२१ ॥

तस्य निःश्वसितं वेदास्तत्र बुद्धिर्न कारणम् ।
अनायासेन लोकेऽपि निःश्वासोद्भव उम्भितः ॥ ५२२ ॥

दृष्टादृष्टतया तत्र मूर्तामूर्ततयाऽपि च ।
चेतनाचेतनत्वेन पदार्थास्सम्प्रकीर्तिताः ॥ ५२३ ॥

पुरुषार्थक्रियार्थत्वे श्रुतेस्स्यात्पौरुषेयता ।
तदभावात्तु निःश्वासन्यायान्नासौ प्रसज्यते ॥ ५२४ ॥

पौरुषापौरुषेयत्वे श्रुतेस्त्वनियतार्थता ।
द्वैतापत्तिरपि प्राप्ता विरुद्धार्थद्वयान्वयात् ॥ ५२५ ॥

अचिन्त्यानन्तसर्वान्तिशशक्तिमत्त्वेऽपि चात्मनः ।
तत्प्रकाशपरत्वेन प्रतिपत्तिस्तदर्थतः ॥ ५२६ ॥

ऋते बुद्धिप्रयोगान्न पदानां परिकल्पनम् ।
सम्बद्धार्थप्रकाराणां वाक्यानां चानुयोजनम् ॥ ५२७ ॥

ततो बुद्धिपुरस्कार्या कार्यता पदवाक्ययोः ।
तत्र तूभयसंभिन्नस्स्वरो बुद्धौ न लीयते ॥ ५२८ ॥

यदि निःश्वसितन्यायात्प्रतीतिरुपपद्यते ।
अबुद्धिप्रसरेणासौ श्रौतोऽर्थः पुरुषाकृतः ॥ ५२९ ॥

बुद्ध्यबुद्धिकृतो भेदः पौरुषापौरुषार्थयोः ।
श्रुतिरुन्नीयते नूनं बुद्धेस्तु परतः परा ॥ ५३० ॥

श्रुतिर्मुख्यतया स्वत्वेऽनुमानादप्यनुत्तमा ।
निरपेक्षप्रमाणत्वान्न तस्याः पुरुषार्थता ॥ ५३१ ॥

बाध्यबाधकभावोऽपि विषयैक्ये प्रवर्तते ।
श्रुतिप्रत्यक्षयोश्चापि तदनैक्यात्स नेष्यते ॥ ५३२ ॥

प्रत्यक्षेणावबोध्येत सत्ता सा व्यावहारिकी ।
परमार्थावबोधात्तु श्रुतेस्स्यात्पृथगर्थता ॥ ५३३ ॥

विशिष्य तत्त्वार्थनिदर्शनादियं,
श्रुतिः परा बुद्धिमनःपथादपि ।
अथात्र मानान्तरसज्जनं वृथा,
स्वतः प्रमाणान्न च पौरुषेयता ॥ ५३४ ॥

अथ पञ्चमः परामर्शः

प्रमेयप्रमितिविमर्शः

यत्प्रमाणपरिक्लृप्तं तत्प्रमेयमुदीर्यते ।
चेतनाचेतनत्वेन पुनस्तद् द्विविधं मतम् ॥ ५३५ ॥

प्राधान्यं चेतनस्यैवमप्रधानमचेतनम् ।
चेतनस्योपभोगार्थं यतश्चैतदचेतनम् ॥ ५३६ ॥

जीवेश्वरतया तस्य चेतनस्य द्विधा स्थितिः ।
प्राधान्यमीश्वरस्यात्र सर्वज्ञत्वादशेषतः ॥ ५३७ ॥

सर्वशक्तिमतस्तस्य सर्वज्ञस्येश्वरस्य च ।
ज्ञानार्थं जीवलोकोऽयं यतते यदहर्निशम् ॥ ५३८ ॥

अभावित्वमनादित्वं जीवमात्रोपकारिता ।
ईश्वरस्यैव कर्तृत्वं कार्यता जगतो यतः ॥ ५३९ ॥

ईष्टे सर्वात्मना योऽसाविष्टानिष्टोपपत्तिषु ।
ऐश्वर्येष्वीशिता यश्च स कोऽपीश्वर उच्यते ॥ ५४० ॥

ईश्वरविषये चार्वाकमतविमर्शः

चार्वाकमतमास्थाय ये तन्मार्गानुयायिनः ।
ईश्वरं ते तु नो किञ्चित्तत्त्वमित्यभिमन्वते ॥ ५४१ ॥

प्रत्यक्षान्नेतरत् किञ्चित्प्रमाणत्वेन सिद्ध्यति ।
प्रत्यक्षीक्रियते नासावीश्वरस्तेन नास्ति सः ॥ ५४२ ॥

बीजाद् याऽप्यङ्कुरोत्पत्तिस्सा संयोगान्मृदम्बुनोः ।
स्वाभाविक्याः कृते तस्या मुधा तत्कर्तृकल्पना ॥ ५४३ ॥

यदि वा कोऽपि कर्ता स्यादुपलभ्येत कर्हिचित् ।
स्वोपलब्धेरभावाच्च नेश्वरो वस्तु किञ्चन ॥ ५४४ ॥

नादृष्टं कारणं किञ्चित् पारलौकिककर्मणः
जीविकासाधनं कर्म वैदिकं तद्विधायिनाम् ॥ ५४५ ॥

शुभं वाऽप्यशुभं कर्म कृत्वा तत्फलमश्नुते ।
लोकस्तत्र प्रभुर्भूपोऽथवाऽन्यो नेश्वरस्तथा ॥ ५४६ ॥

निग्रहानुग्रहार्थं च नादृष्टः कश्चिदीशिता ।
लौकिकालौकिकं कर्मद्वयं नैसर्गिकं खलु ॥ ५४७ ॥

जातमात्रशिशोर्दुःखं सुखं वा स्याद् यदृच्छया ।
सर्वं तत्काकतालीयन्यायादेवोपपद्यते ॥ ५४८ ॥

तस्मान्नादृष्टमस्तीदं कारणं कस्यचित्कृते ।
तेन नेश्वरसंसिद्धिश्चार्वाकमतसम्मता ॥ ५४९ ॥

ईश्वरविषयकमतान्तरविमर्शः

जैनबौद्धमतेऽप्येष ईश्वरो विनिवारितः ।
अर्हद्बुद्धातिरिक्तो नो कश्चिदत्राभिसम्मतः ।। ५५० ।।

सांख्यसिद्धान्तनिष्पन्नः पुरुषो जीवसंज्ञकः ।
तद्भिन्नो नेश्वरः कश्चित्पदार्थः परिकल्पितः ।। ५५१ ।।

मीमांसकमते त्वेतत्कर्मैव प्रविधायकम् ।
शुभस्याप्यशुभस्यापि कर्मणो नेश्वरो मतः ।। ५५२ ।।

केचिन्मीमांसकास्तेषु स्वीकुर्वन्तीश्वरं विभुम् ।
किन्त्वमीषां मतं तत्र गण्यते चैकदेशि तत् ।। ५५३ ।।

परा किं वा च पश्यन्ती मध्यमा वैखरी तथा ।
चतुर्धा प्रविभक्तेयं वागेव प्रथमादृता ।। ५५४ ।।

वैयाकरणसिद्धान्तसारभूतोऽयमिष्यते ।
मूलाधारपरानामशब्द ईश्वरसंज्ञकः ।। ५५५ ।।

नियन्तृत्वेन जीवानां जीवभिन्नस्स ईश्वरः ।
जडचेतनवर्गोऽयं तच्छरीरतया मतः ।। ५५६ ।।

जीवान्तर्गामिता तस्य कर्मणः फलदातृता ।
आनन्दमयता चेत्थं सर्वतो ज्ञानरूपता ।। ५५७ ।।

एवं रामानुजाचार्यमतेऽङ्गीकृत ईश्वरः ।
ज्ञानादीनां गुणानां च जीवानां चैक आश्रयः ।। ५५८ ।।

स्वरूपज्ञानतो भिन्नं गुणभूतं यदुच्चितम् ।
जगत्कार्यं तदुत्पत्तावीश्वरो हेतुरुच्यते ।। ५५९ ।।

तत्कृते हेतुता तस्य त्रिविधा परिकीर्तिता ।
निमित्ततदुपादान-सहकारिप्रभेदतः ।। ५६० ।।

स्वसंकल्पविशिष्टत्वे निमित्तं सोऽस्ति कारणम् ।
चिदचिद्भासमानस्य तस्योपादानता मता ॥ ५६१ ॥

ज्ञानशक्तिक्रियाविष्टस्सहकारी स इष्यते ।
सर्वावयवसामर्थ्यात्प्रभुरीशो न चेतरः ॥ ५६२ ॥

जीवकर्मानुसारित्वादीश्वरे फलदातृता ।
वैषम्यं दूषणं न स्यात्तेन तत्र व्यवस्थितौ ॥ ५६३ ॥

माध्वमाहेश्वरन्यायवैशेषिकमतेष्वथ ।
उपादानतया नेष्टा पृथगीश्वरहेतुता ॥ ५६४ ॥

जगदुत्पत्तिहेतुत्वे निमित्तं केवलं हि सः ।
तस्यैव फलदातृत्वं कर्मधर्मानुबन्धनात् ॥ ५६५ ॥

तेष्वमी नकुलीशाद्याः प्रत्यभिज्ञानवादिनः ।
नैव पाशुपताश्चास्य मन्वते कर्मतन्त्रताम् ॥ ५६६ ॥

तस्य कर्मावलम्बित्वे स्वातन्त्र्यं क्षीयते यतः ।
ततः कर्मानुबन्धित्वान्नास्य स्यात्फलदातृता ॥ ५६७ ॥

जीवभिन्नो मतस्सोऽयं तत्र पातञ्जलाध्वनि ।
नोपादानं निमित्तं वा कारणं निर्विशेषतः ॥ ५६८ ॥

अद्वैतवादिनामीशो निर्गुणो निर्विशेषकः ।
वाक्चेतोबुद्धयतीतोऽसावनिर्वाच्यतया मतः ॥ ५६९ ॥

परमार्थस्स एवैको निर्गुणत्वात्प्रकल्पितः ।
व्यवहारार्थसत्ताकं जगन्नो परमार्थसत् ॥ ५७० ॥

जगतस्तादृशस्यास्य मायोपाधिक ईश्वरः ।
हेतुरुक्तो न कार्यत्वं हेतुत्वं वा परात्मनः ॥ ५७१ ॥

स्वप्राधान्यान्निमित्तत्वमुपादानत्वमन्यतः ।
मायाप्राधान्यतस्तस्य हेतुत्वं तन्निरूपितम् ॥ ५७२ ॥

ईश्वरसत्त्वे प्रमाणम्

नास्तिकैरास्तिकैश्चापि सदेकं प्रणिधीयते।
नास्त्यस्तीतिपदद्वारा निषेधो विधिरुह्यते॥ ५७३॥

निषिध्यते सदेवात्र सदेव प्रविधीयते।
असत्यर्थे निषेधस्य विधेर्वा कल्पना मुधा॥ ५७४॥

अवस्थाभेदतस्तत्र प्रकारद्वयमास्थितम्।
मुक्तेः पश्चात्ततः पूर्वं तज्ज्ञानमवधीयते॥ ५७५॥

निरवच्छिन्नस्वरूपेऽवस्थानं मुक्तिरुच्यते।
तत्र नौपाधिकं द्वैतं सिद्ध्येदद्वैतिनां मते॥ ५७६॥

न्यायवैशेषिकैस्सांख्यैस्तथा पातञ्जलादिभिः।
स्वरूपान्नो पृथग्भूतः कश्चिदीश्वर इष्यते॥ ५७७॥

द्वैतिनस्तार्किकाः केचित्प्रतितिष्ठन्ति चान्यथा।
मुक्तौ प्रत्यक्षता तस्य तत्पूर्वं तत्त्ववेतृता॥ ५७८॥

तदन्वेषणसम्बुद्ध्या स्वात्मज्ञानमुदीर्यते।
श्रुतेः प्रागनुमानस्य प्रवृत्तिस्तत्र जायते॥ ५७९॥

श्रुतेः प्राग्गतिरस्त्यत्रानुमानं तु स्खलद्गति।
अद्वैत्यभिमतः पन्थाः परमार्थप्रसाधने॥ ५८०॥

दृष्टत्वे सिद्ध्यदप्येतदनुमानं निरर्थकम्।
अदृष्टार्थपरिज्ञाने सर्वथा श्रुतिमन्तरा॥ ५८१॥

ज्ञातुर्ज्ञेयस्य भिन्नत्वेऽनुमानं प्रबलं भवेत्।
तयोरैक्ये तु शब्दस्य प्रामाण्यमुपयुज्यते॥ ५८२॥

साक्षात्कृतिरभेदस्य शब्दादेव प्रसिद्ध्यति।
सविशेषेऽनुमानं स्यान्निर्विशेषे न तत्तथा॥ ५८३॥

ब्रह्मात्मैक्यप्रबोधे तु श्रुतेरप्यसमर्थता ।
निषेधेनैव तद्बोधं निर्दिशन्तीयमादृता ॥ ५८४ ॥

निर्विशेषस्य सम्बन्धस्साध्यसाधनयोः कुतः ।
सोपाधित्वेऽनुमानस्यावकाशस्तत्र सम्भवेत् ॥ ५८५ ॥

तस्य तु निरुपाधित्वे श्रुतेः पश्चादथोद्भवत् ।
व्यर्थमेवानुमानं तत्सोपाधीश्वरकल्पकम् ॥ ५८६ ॥

उपक्रमपरामर्शोपसंहारादिसाधनैः ।
श्रुतेस्तात्पर्यमुद्भाव्य सविशेषं तदुह्यते ॥ ५८७ ॥

कामं तत्रानुमानं तत्पार्षदं गमकं भवेत् ।
निर्विशेषे तु तात्पर्यं नोपपन्नं निषेधतः ॥ ५८८ ॥

श्रुत्यनुश्रयणादेतन्निषेधानुविधित्सया ।
तात्पर्यानुपपत्त्याऽत्र लक्षणावृत्तिरिष्यते ॥ ५८९ ॥

संदेहे सत्यवेक्ष्यैतज्जन्यं क्षित्यङ्कुरादिकम् ।
स्वभावादुद्भवो वाऽस्य कर्तृसंयोगतोऽथवा ॥ ५९० ॥

तन्निवृत्तिः श्रुतिद्वारा पूर्वमेव प्रकल्पते ।
ततोऽनुमितिरप्यत्र पार्षद्यमनुविन्दति ॥ ५९१ ॥

चेतनस्यानुसंयोगादृते नाचेतनान्वितिः ।
दृश्यते श्रूयते क्वापि परिणामतया स्वतः ॥ ५९२ ॥

स्वातन्त्र्येण प्रधानस्याचेतनस्य प्रवर्तनम् ।
सांख्यैरनुमतं त्वेतच्चेतनार्थं तदन्ततः ॥ ५९३ ॥

भूतभौतिकवर्गस्य स्वतो न क्रियमाणता ।
तेन चैतन्यमुन्नेयं स्वभावस्तु तदाश्रितः ॥ ५९४ ॥

तदेतत्सिद्धमाराच्च नेश्वरं येऽभिमन्वते ।
तेऽपि मुक्त्यर्थमिच्छन्ति तत्त्वज्ञानमनुत्तमम् ॥ ५९५ ॥

विविक्तत्वेन तत्त्वार्थो निर्विशेषेण भासते ।
मूलमेतन्न विच्छिन्नं विभिन्नेषु मतेष्वपि ॥ ५९६ ॥

जीवस्वरूपविमर्शः

जीवो नित्योऽथवाऽनित्यस्तथा किंपरिणामकः ? ।
लौकायतिकपक्षेण तत्र पूर्वं विचार्यते ॥ ५९७ ॥

चैतन्येन विशिष्टस्य देहस्यैवात्र कर्तृता ।
भोक्तृता चाप्यमुष्यैव तेनायं जीवनामभाक् ॥ ५९८ ॥

पृथिव्यब्वायुतेजोवच्चतुस्तत्परमाणुभिः ।
तत्स्वरूपं परिक्लृप्तं चैतन्यं तेन जृम्भते ॥ ५९९ ॥

तद्विशिष्टस्य देहस्य चैतन्ये बोधरूपता ।
जडता चाविशिष्टस्योभयत्वं स्यात्तदंशतः ॥ ६०० ॥

देहस्यानेकता तस्माज्जीवस्यापि तथा स्थितिः ।
सह सञ्जायमानत्वादनित्यत्वमपि ध्रुवम् ॥ ६०१ ॥

प्राण एवैष जीवात्मा मनो वेन्द्रियमेव वा ।
देहो वेति प्रभिन्नानि मतान्येषां पृथक् पृथक् ॥ ६०२ ॥

भासमानस्य जीवस्य व्यवहारदशाभृतः ।
तस्य मूलस्वरूपं तु शून्यमेवेति सौगताः ॥ ६०३ ॥

तस्य विज्ञानरूपत्वात् क्षणिकत्वादपि क्रमात् ।
प्रवाहप्रतिभिन्नत्वादनित्यत्वमुदीर्यते ॥ ६०४ ॥

पूर्वपूर्वकविज्ञानजन्यसंस्कारधारणात् ।
उत्तरोत्तरसंक्रान्तेरनुभूतिस्मृतिक्रिया ॥ ६०५ ॥

स देहपरिमाणेन तद्वदेव विवर्धते ।
क्षीणे क्षीणत्वमायाति तद्भिन्नोऽपीति चार्हकाः ॥ ६०६ ॥

तेन जीवात्मनस्तस्योपचयापचयक्रिया ।
कूटस्थत्वेन नित्यत्वमस्य नैवेति सम्मतम् ॥ ६०७ ॥

एकरूपेण यस्य स्याच्छश्वदेवात्र संस्थितिः ।
तदेव किल कूटस्थं नित्यमक्षयमुच्यते ॥ ६०८ ॥

कूटस्थनित्यत्वविमर्शः

आत्मनो कीर्तिता ये वा सुखदुःखादयो गुणाः ।
तेष्वनित्येषु तत्तस्याप्यनित्यत्वं प्रसज्यते ।। ६०९ ।।

धर्मिणो विकृतेरेव तद्धर्मास्स्युर्विकारिणः ।
तथात्वे नात्मनस्सिद्धयेन्नित्यत्वेनाविकारिता ।। ६१० ।।

शब्दस्पर्शादयः पञ्च गुणा गन्धयुजो ननु ।
पृथिव्यां तेन चान्येभ्यस्तस्यास्स्थूलत्वमुच्यते ।। ६११ ।।

तच्चतुर्गुणकं सूक्ष्मं सलिलं पृथ्व्यपेक्षया ।
ततोऽपि त्रिगुणं सूक्ष्मतरं तेजोऽभिधीयते ।। ६१२ ।।

तेजसोऽप्यनिलस्सूक्ष्मतमोऽसौ द्विगुणस्स्मृतः ।
एकमात्रगुणत्वेनातिसूक्ष्मं व्योम विश्रुतम् ।। ६१३ ।।

ततोऽप्यतितरां सूक्ष्मोऽयमात्मा परिकल्पितः ।
स्वत्वसामान्यतस्तस्य स्वस्मिन्नेव व्यवस्थितेः ।। ६१४ ।।

तद्गुणानामतद्रूपेऽवस्थानात्केवलात्मनः ।
तदुत्पत्तिविनाशाभ्यां विकारस्तस्य नोदयेत् ।। ६१५ ।।

तेन कूटस्थनित्योऽयमविकार्योऽथ निर्गुणः ।
स्वतस्सम्भासमानत्वादिति वेदान्तिनां मतम् ।। ६१६ ।।

मतान्तरविमर्शः

ज्ञानाद् भिन्नोऽप्यभिन्नोऽपि स स्याद्‌वादिकसम्मतः ।
जैमिनीयमते त्वेष चेतनोऽपि जडोंऽशतः ॥ ६१७ ॥

बोधाबोधस्वरूपोऽयमिति भट्टानुयायिनः ।
ज्ञानमात्रात्मकत्वेन चिदात्मेति प्रभाकरः ॥ ६१८ ॥

सांख्याः पातञ्जलाश्शैवास्तथा तन्मतवादिनः ।
तस्य ज्ञानस्वरूपत्वं प्रकल्पन्ते चिदात्मनः ॥ ६१९ ॥

न्यायवैशेषिकद्वैतिविशिष्टाद्वैतिनस्तथा ।
आत्मनस्सगुणत्वेन प्रतिष्ठामधिकुर्वते ॥ ६२० ॥

सगुणागुणवत्त्वेन तस्य रूपं न भिद्यते ।
तत्त्वतो यन्न पर्येति तत्र कोऽयं विपर्ययः ॥ ६२१ ॥

आत्मत्वमुपगच्छन्ति बौद्धा विज्ञानसन्ततेः ।
गुणभूततया तस्याः परिमाणो न युज्यते ॥ ६२२ ॥

न तद्‌रूपस्य तस्यास्ति कश्चिदन्यः समाश्रयः ।
आश्रयाभावतोऽप्यस्य न सिद्धयेत् परिमाणता ॥ ६२३ ॥

विशिष्टाद्वैतिनश्चान्ये द्वैतिप्रभृतयः परे ।
जीवात्मनोऽणुरूपत्वमूरीकुर्वन्त्यनामयम् ॥ ६२४ ॥

न्यायवैशेषिकाद्वैतिसांख्यपातञ्जलादयः ।
व्यापकस्सर्वगामित्वाज्जीवात्मेत्यनुमन्वते ॥ ६२५ ॥

तस्य कर्तृत्वमप्याहुस्सत्यमित्यपरेऽन्यथा ।
अन्यैर्नैमित्तिकं प्रोक्तं कैश्चिदौपाधिकं तु तत् ॥ ६२६ ॥

प्रातिभासिकमेवैतत्प्रकृतेस्तु निसर्गतः ।
तथैव खलु भोक्तृत्वमस्येत्यन्यैर्निगद्यते ॥ ६२७ ॥

कर्तृता भोक्तृता तस्य भूयसा न निषिध्यते।
वास्तवावास्तवत्वेऽस्मिन् विवादास्सन्तु भूरिशः ॥ ६२८ ॥

न कर्तृता नापि च भोक्तृता तथा,
निषिध्यमाना बहुशोऽपि दृश्यते।
तदात्मताऽपि प्रतिनामभेदतः,
समीकृता सर्वमतेषु तिष्ठति ॥ ६२९ ॥

अथ षष्ठः परामर्शः

परमाणुविमर्शः

दृश्यमानेषु तेष्वत्र भूतादिष्वखिलेष्वपि ।
तदस्तित्वे न केषाञ्चिद् विवादस्सम्प्रवर्तते ।। ६३० ।।

जालान्तर्निपतन् सूक्ष्मो यश्च सूर्यरजः कणः ।
स एष परमाणुस्स्यादचिद्वर्गैककारणम् ।। ६३१ ।।

तस्य सूक्ष्मतमत्वेन हेतुत्वमुपपद्यते ।
पदार्थप्रविभागेन स चतुर्धाऽथ पञ्चधा ।। ६३२ ।।

लौकायतिकबौद्धादिमते नाकाशमिष्यते ।
ततस्तत्र चतुर्धाऽयं पञ्चधा चान्यवादिनाम् ।। ६३३ ।।

तत्र सूर्यमरीचिस्थे रजस्यवयवो हि यः ।
तस्यैव परमाणुत्वमनुमानात्प्रसिद्ध्यति ।। ६३४ ।।

समग्रस्य प्रपञ्चस्य प्रवाहोऽयं निरन्तरः ।
अविच्छिन्नतयोद्भूतस्तत एवेति सौगताः ।। ६३५ ।।

न्यायौलूक्यविदां पक्षे रजसोऽवयवेऽपि यः ।
तद्भिन्नोऽवयवः पूर्वः पराणुस्सोऽनुमीयते ।। ६३६ ।।

तद्द्वयस्यानुसंयोगाद् द्व्यणुकस्त्र्यणुकस्ततः ।
विस्फुटन् विकसन्नेवं वर्गसर्गैकहेतुकः ।। ६३७ ।।

नित्योऽयमिति केप्याहुस्तदन्ये त्वन्यथादृशः ।
न तत्सत्त्वे प्रवादोऽयं स्वरूपे तु पृथङ्मतिः ।। ६३८ ।।

जैमिनीये च शाब्दे च परमाणोरनित्यता ।
तथा व्योम्नोऽपि शब्दोऽयं सृष्टेर्मूलमथोदितः ।। ६३९ ।।

पृथ्व्यादेः पूर्वंपूर्वस्य कारणं चोत्तरोत्तरम् ।
सर्वस्याप्यन्ततश्चैको हेतुश्शब्दोऽयमीरितः ॥ ६४० ॥

शब्दप्रमितिवादोऽयं नादृतो दर्शनान्तरे ।
अस्योत्पत्तिरहङ्कारात् यतो हि परिकल्पिता ॥ ६४१ ॥

वस्तुतोऽवयवित्वेन यावत्सम्भासमानता ।
गोचरीकरणात्तावत्पराणुत्वे न युज्यते ॥ ६४२ ॥

यन्त्रतोऽप्यनुसन्धाने गोचरीक्रियते द्व्यणुः ।
समाधिप्रणिधानेन तस्य साक्षात्कृतिर्भवेत् ॥ ६४३ ॥

यच्चाधुनिकपाश्चात्त्यानुसन्धातृभिरिष्यते ।
न तद्रूपतया क्लृप्तं तदस्तित्वं श्रुतोदितम् ॥ ६४४ ॥

मूलाभावादमूलत्वं मूलस्येति प्रमीयते ।
पराणोर्मूलरूपत्वान्न तन्मूलान्तरं क्वचित् ॥ ६४५ ।

तथात्वे प्रत्यभिज्ञानं साक्षादेव प्रसज्यते ।
नेष्टापत्तिर्यतः प्राहुर्निर्मूलत्वेन तत्स्थितिः ॥ ६४६ ॥

निर्मूलस्य जडस्यास्य परमाणोर्न हेतुता ।
सृष्ट्युत्पत्तिविधौ सिद्ध्येदृते चिच्छक्त्युपाश्रयात् ॥६४७॥

चितेस्सूक्ष्मतमत्वेन तदनुप्राणितस्तथा ।
परमाणुरिति प्रोक्तस्सर्गमूलमनादितः ॥ ६४८ ॥

उताहो तदभिन्नोऽयं सत्त्वेन प्रणिधीयते ।
सतोऽसज्जायते यस्मान्न तत्तस्मात्पृथङ्मतम् ॥ ६४९ ॥

सतस्समनुरूपत्वादभावो नासतो मतः ।
सदसत्त्वप्रकारेण तयोर्भेदस्तु कल्पितः ॥ ६५० ॥

असतस्तु सतो भावे स्यान्निषेधो निरर्थकः ।
निषिध्यते सदेवात्र सदेव प्रविधीयते ॥ ६५१ ॥

सत्त्वाच्च चिदभिन्नत्वाज्जालसूक्ष्ममरीचिवत् ।
क्रियावत्त्वाज्जगन्मूलं पराणो रूपकल्पनम् ॥ ६५२ ॥

सतो वाप्यसतो वापि हेतुत्वं तत्र कल्प्यते ।
सदसत्त्वानवच्छिन्नचिदभिन्नत्वलक्षणात् ॥ ६५३ ॥

विरुद्धोभयभावान्तर्मूलत्वे न विरोधिता ।
पराणोस्सम्प्रसज्येत सच्चिदेकान्तसंश्रयात् ॥ ६५४ ॥

आरम्भादिवादविमर्शः

विवर्तारम्भसंघातपरिणामक्रमोदिताः ।
अमी वादाः प्रवर्तन्ते दृश्यमात्रोपपादने ॥ ६५५ ॥

विवर्तोऽद्वैतसिद्धान्त आरम्भो न्यायसम्मतः ।
संघातस्सौगतश्चैवं परिणामस्तु कापिलः ॥ ६५६ ॥

अतात्त्विकान्यथाभावो विवर्तः प्रतिपादितः ।
स्वरूपादपृथग्भूतो रूपान्तरमवापितः ॥ ६५७ ॥

यथा सर्पगतो रज्जुस्स्वरूपान्नातिरिच्यते ।
रजताकारतो भान्ती यथा शुक्तिरनन्यथा ॥ ६५८ ॥

तथा ब्रह्मसकाशाच्च प्रपञ्चोऽयं विवर्तते ।
तद्विवृत्तेरतद्रूपे तत्र ब्रह्म प्रकाशते ॥ ६५९ ॥

विवर्तोऽध्यास इत्येतौ नामभिन्नौ न तत्त्वतः ।
तद्विवर्तनतोऽनन्यत्तदध्यसनमप्यथ ॥ ६६० ॥

समवाय्यसमवायिनिमित्तत्रिकहेतुभिः ।
कार्यमारभ्यतेऽन्योन्यं सम्भूय स्वेतरच्च तत् ॥ ६६१ ॥

कारणत्रयसन्नुन्नं कार्यमत्राभ्युपेयते ।
तन्मूलकतदारम्भादारम्भ उपपादितः ॥ ६६२ ॥

तन्तुव्यूहसमारब्धं कार्यं यत्पटरूपकम् ।
ततस्तद्भिन्नमाभातीत्येष निष्कर्ष ईप्सितः ॥ ६६३ ॥

कारणं समवायीति नोपादानाद् विभिद्यते ।
ततस्तद्व्यूहनिष्पन्नं कार्यमेतन्न भेदभाक् ॥ ६६४ ॥

हेतुसंघातसम्पन्नः कार्यसंघात इत्यतः ।
तत्तयोर्भेदनिष्पत्तिर्नेष्टा संघातवादिनाम् ॥ ६६५ ॥

कारणस्य प्रणाशेन कार्योत्पत्तिरिहोदिता ।
अभावाद् भावसम्भूतिस्संघातोऽप्याशुनाशवान् ॥ ६५६ ॥

कार्यतो भिद्यमानत्वात्क्षणिकत्वादनुक्षणम् ।
नवीनोद्भूतरूपत्वात्संघातस्यास्तिता मता ॥ ६६७ ॥

असद्रूपस्य शून्यस्य कार्यरूपेण भासनात् ।
असत्ख्यातिरभिप्रेता तद्विदां शून्यवादिनाम् ॥ ६६८ ॥

तत्र विज्ञानरूपत्वं केचिदिच्छन्ति चात्मनः ।
कार्ये तद्रूपतो भानादात्मख्यातिरितीष्यते ॥ ६६९ ॥

आत्मरूपं समुत्सृज्य रूपान्तरमुपागतः ।
तात्त्विकस्यान्यथाभावः परिणाम उदाहृतः ॥ ६७० ॥

स्वद्रवत्वं यथोत्सृज्य पयो दध्यात्मतामितम् ।
तथैव प्रकृतेरेष परिणामोऽखिलं जगत् ॥ ६७१ ॥

विवृत्तिरनुवृत्तिश्च प्रवृत्तिश्चेत्यनुक्रमः ।
सृष्टयुत्पत्तेः परं मूलं वादानां सारमूह्यते ॥ ६७२ ॥

संघातोऽप्यत्र संश्लिष्टो जगत्संवृत्तिलक्षणः ।
तदुत्पादकसिद्धान्ते विरोधः प्रातिभासिकः ॥ ६७३ ॥

वृत्तरेकैव निर्वृत्या सैषाऽपि प्रविलीयते ।
तदा तल्लक्षणः कश्चिच्चिदानन्दोऽनुभूयते ॥ ६७४ ॥

एकदृष्टयात्मकः कश्चित्सृष्टिवादोऽपि नो पृथक् ।
विवर्तप्रतिसन्धानात्तत्रान्तर्भावमाप्नुयात् ॥ ६७५ ॥

समग्रस्यापि विश्वस्य दृश्यसृष्टिरविद्यया ।
तत्रात्मानेकताभानात्स्यात्प्रपञ्चोऽप्यनेककः ॥ ६७६ ॥

तदेकत्वे तदेकत्वमनेकत्वे त्वनेकता ।
वैशिष्टयञ्चैतदेवात्र प्राशस्त्यञ्चैकताश्रयात् ॥ ६७७ ॥

यद्यप्यद्वैतवादस्य तान्त्रिका ह्यनुयायिनः ।
तथापि प्रतिबिम्बाख्यो वादस्तैरभ्युपेयते ॥ ६७८ ॥

आरम्भेऽद्वैतहानिस्स्यात्परिणामे विकारिता ।
सघातेऽभावनिष्पत्तिर्विवर्तेऽध्यासमात्रता ॥ ६७९ ॥

प्रतिबिम्बतया सर्वं जगदेतद् विभासते ।
तदन्तर्गततासिद्धेर्बिम्बमेकं चकास्ति तत् ॥ ६८० ॥

यथादर्शगतं सम्यक्तत्र भाति मुखादिकम् ।
तथा ब्रह्मैकबिम्बोत्थं प्रतिबिम्बात्मकं जगत् ॥ ६८१ ॥

प्रतिबिम्बं ध्रुवं चैतद् विना बिम्बेन नोद्भवेत् ।
द्वैतापत्तिस्ततश्चात्र नैव संसज्यते मनाक् ॥ ६८२ ॥

निमित्तं बिम्बमित्याहुर्नोपादानं निजान्वितेः ।
निमित्तमन्तरा कार्यं भवद्बुत्पत्तिकं मतम् ॥ ६८३ ॥

दण्डाभावात्क्रियादीनां क्रियातो घटसम्भवः ।
सम्भवेत्प्रतिबिम्बं तद् बिम्बस्थानस्थमायया ॥ ६८४ ॥

निश्शेषात्सम्भवद्रूपाद् बिम्बाच्च प्रतिबिम्बितैः ।
विस्फुटद्भिर्ग्रहैरन्यैर्विशेषोऽन्तर्वितन्यते ॥ ६८५ ॥

विस्फुटन्तो ग्रहाश्चैते मूलबिम्बानुभावतः ।
उत्पद्यन्ते विलीयन्ते ब्रह्माण्डान्तर्विकासिनः ॥ ६८६ ॥

तेष्वन्योन्योपमर्दोत्थैस्सन्निकर्षादुपग्रहैः ।
विनश्यद्भिः प्रजन्यन्ते प्रकम्पोपप्लवक्रियाः ॥ ६८७ ॥

अवृष्टिरतिवृष्टिश्च स्खलनोत्तापनादयः ।
प्रत्यवायाः प्रजायन्ते ग्रहेष्वन्तर्विकर्षणैः ॥ ६८८ ॥

पराणोरवशेषोऽस्माद् विशेषात्प्रतिभिद्यते ।
काणादं दर्शनं चैतत्सर्गारम्भनिदर्शनम् ॥ ६८९ ॥

बिम्बस्थाविद्ययोद्भूतं प्रतिबिम्बात्मकं जगत् ।
ब्रह्मण्येवावभासेत मूलबिम्बाधिविष्ठितम् ॥ ६९० ॥

क्वचिदारम्भतः क्वापि स्फोटतः परिणामतः ।
क्वचित्संघाततः सर्गक्रिया क्वापि विवर्ततः ॥ ६९१ ॥

मूलविम्बानुविम्बोद्यत्प्रतिविम्बानुबन्धतः ।
क्वचित्सृष्टिरियं प्रोक्ता सिद्धान्तान्न विरुध्यति ।। ६९२ ।।

शब्दमात्रप्रभेदेऽपि नार्थभेदोऽत्र वस्तुतः ।
परमार्थानुसन्धानात्पार्थक्यं त्वौपचारिकम् ।। ६९३ ।।

मूलहेतूद्भवा वादास्सृष्टिपर्यवसायिनः ।
एकवाक्यतया तेषां तात्पर्यमवसीयते ।। ६९४ ।।

शुक्तितो रजतोत्पत्तिरनिर्वाच्या भ्रमात्मिका ।
सैषाऽनिर्वचनीयाख्या ख्यातिरित्युच्यते किल ।। ६९५ ।।

दोषाच्छुक्तिगतं भाति रजतं नापि तत्त्वतः ।
नास्ति नोत्पद्यते स्वत्वादन्यथाख्यातिरित्यसौ ।। ६९६ ।।

तत्प्रतीतेस्तदस्तित्वं संसिध्येत्प्रातिभासिकम् ।
सति हेतौ फलोत्पत्तिरियं सत्ख्यातिरिष्यते ।। ६९७ ।।

असत्त्वाद् रजतस्यास्य प्रतीतिरपि दुर्घटा ।
इदन्त्वेनांशतो भानं साम्यादख्यातिरुच्यते ।। ६९८ ।।

इत्येताः ख्यातयः प्रोक्ता नैकदर्शनविश्रुताः ।
अत्रापि भ्रान्तिरूपासु ख्यातिषु त्वैक्यमेव तत् ।। ६९९ ।।

कार्यकारणविमर्शः

उपादानात्पृथग्भूता कार्योत्पत्तिरितीरिता ।
तयोर्भेदेऽथ सम्बन्धस्समवायोऽपि कल्पितः ॥ ७०० ॥

पटेऽन्तस्तन्त्वनुस्यूतेर्न प्रतीतिः पृथक्तया ।
हेतुहेतुमतोर्भेदोऽनुपलब्धेर्न सिद्ध्यति ॥ ७०१ ॥

गौरवादेकसम्बन्धस्वीकाराद् गौरवान्तरात् ।
सूपपन्नस्तयोर्भेदो भवेदारम्भवादिनाम् ॥ ७०२ ॥

अतद्बुद्धिर्मिथस्तत्र भेदादेवोपयुज्यते ।
अतदाकारताभानाद् द्वयोस्सन्दृश्यते भिदा ॥ ७०३ ॥

संज्ञासंख्यातदाकारज्ञानकार्यप्रभेदतः ।
कार्यकारणयोर्नैक्यं न्यायौलूक्यनयादृतम् ॥ ७०४ ॥

असत्कार्याभिनिष्पत्तिः कारकक्रियया स्मृता ।
सत्तयाऽन्वितिरुत्पत्तिरित्येषां मतमन्ततः ॥ ७०५ ॥

किञ्च तद्भिन्नमुन्नीतं मतं तत्त्वान्तदर्शिनाम् ।
विवर्तप्रतिसंघातपरिणामाध्वगामिनाम् ॥ ७०६ ॥

हेतुहेतुमतोस्तत्राभेद एवेति सम्मतम् ।
समवायोऽपि सम्बन्धो नोपपन्नोऽथ सम्भवेत् ॥ ७०७ ॥

उपादानोदितं कार्यं तद्रूपान्तरमेव तत् ।
तत्रावस्थादिसंभेदाद् विभेदोऽप्यनुभूयते ॥ ७०८ ॥

कारणस्थप्रमाणेन द्विगुणान्तप्रमाणकम् ।
कार्यं स्यादित्यतो नेष्टस्तयोर्भेदोऽत्र तत्त्वतः ॥ ७०९ ॥

आविर्भावतिरोभावक्रिया नैसर्गिकी तयोः ।
वस्तुप्रकृतिसंरोधि न किञ्चित्प्रतिबन्धकम् ॥ ७१० ॥

कार्यावस्थाविशेषस्योपलब्धेरवरोधकम् ।
यद्धि तद्वारणायैव कारणं विनियोज्यते ॥ ७११ ॥

तद्वृत्तिरपि तद्रूपा प्रतिघातोपरोधिका ।
तस्य तद्रूपतापत्तिर्निर्विघ्नं जायते यतः ॥ ७१२ ॥

सुखदुःखादिरूपेण प्रकृतेर्यो विपर्ययः ।
धर्माधर्मादिहेतुत्वं तस्यैतत्परिकल्प्यते ॥ ७१३ ॥

सुखहेतुर्भवेद् धर्मो दुःखस्य प्रतिबन्धकः ।
अधर्मो दुःखमूलं स्यात्सुखस्य प्रतिरोधकः ॥ ७१४ ॥

धर्माधर्मौ प्रहायात्र सदसत्कर्मणोस्तथा ।
हेतुत्वे कल्प्यमानेऽपि स्वभावस्तदवस्थितः ॥ ७१५ ॥

अदृश्यावयवित्वेन स्वोत्पत्तेः प्रागवस्थितेः ।
सोऽपि सत्कार्यवादोऽत्र नास्तिकास्तिकसम्मतः ॥ ७१६ ॥

तदुत्पत्तिविनाशाभ्यां तद्गताकृतिविक्रिया ।
मूलप्रकृतिसद्भावस्ताभ्यां नैव विकार्यते ॥ ७१७ ॥

पटादिष्वथ नष्टेषु शकलाद्यात्मना स्थितेः ।
तत्कार्यं लब्धसत्ताकं विनाशो न निरन्वयः ॥ ७१८ ॥

तप्तायोगोलके प्रोच्चैः प्रपतन्तोऽम्बुबिन्दवः ।
अदृश्याङ्गतया तस्मात्पृथक् सन्त्यात्मसत्तया ॥ ७१९ ॥

अचिद्वर्गविमर्शः

अचिद्रूपस्य चिद्भिन्नजडवर्गस्य सर्जनम् ।
निष्प्रयोजनकं नेति भोग्यत्वाद् भोक्तुरात्मनः ॥ ७२० ॥

सृष्टिरेषां पदार्थानां जडानां सप्रयोजनम् ।
जीवभोगार्थमाभाति सर्वसिद्धान्तसंस्तुता ॥ ७२१ ॥

शब्दस्पर्शादिकेष्वेषु विषयेषु यदाऽऽत्मनः ।
स्पृहोदेतीन्द्रियैर्योगात्तदा तद्भोगभावना ॥ ७२२ ॥

मनोवृत्त्यानुकूल्याच्च प्रातिकूल्याच्च देहिनः ।
सुखदुःखानुभूतिस्स्यादात्मधर्मानुबन्धिनी ॥ ७२३ ॥

शब्दादिविषयग्राहीणीन्द्रियाणि जडान्यपि ।
सात्त्विकानीत्यतस्तानि प्रकाशोपस्कृतान्यपि ॥ ७२४ ॥

प्रकाशात्मिकया शक्त्या सहैषामनुयोगतः ।
तमो व्याप्रियते नात्र घटादिविषयेष्विव ॥ ७२५ ॥

सत्त्वसम्पत्तिरेकत्र प्रकाशोद्भूतिरित्यतः ।
तदभावादथान्यत्र तमस्स्तोमानुबन्धनम् ॥ ७२६ ॥

भूतनिष्ठगुणग्रामग्रहणादुपपद्यते ।
श्रोत्रादीनाममीषान्तु भौतिकत्वमनन्यकम् ॥ ७२७ ॥

व्योमादिपञ्चभूतानां श्रोत्रादीन्द्रियपञ्चकम् ।
कार्यमाहुर्विशिष्यैतद् गुणानुग्रहणादिदम् ॥ ७२८ ॥

सात्त्विकादप्यहङ्कारादिन्द्रियाण्युद्भवन्त्यतः ।
तान्यहङ्कारकाण्येव भौतिकानीति नोचितम् ॥ ७२९ ॥

शब्दादिपञ्चतन्मात्रसंयोगाच्च तदुद्भवः ।
तस्मात्तद्विषयादानोपपत्तिश्चेति कापिलाः ॥ ७३० ॥

यच्च यस्य च तन्मात्रानुबन्धेन प्रजायते ।
तत्र तद्विषयादानसामर्थ्यं विनियम्यते ।। ७३१ ।।

तदंशैः केवला पुष्टिस्तद्गुणग्रहणेऽर्हता ।
तन्मात्रोद्भूतिरेतेषां नेष्यते दर्शनान्तरे ।। ७३२ ।।

सत्त्वतो भौतिकत्वोक्तिरतथात्वमसत्त्वतः ।
द्वयं संगच्छते चैतच्छाङ्करं मतमुत्तमम् ।। ७३३ ।।

परिमाणेऽप्यणुत्वं वा विभुत्वं वेत्यलं भिदा ।
प्रत्यक्षं नैकतोऽन्यस्य मिथोऽतीन्द्रियतोचिता ।। ७३४ ।।

इत्थं ज्ञानेन्द्रियाण्याहुर्मतभेदान्मनीषिणः ।
वस्तुतश्चैकमत्येन तदस्तित्वेऽविरोधिता ।। ७३५ ।।

पञ्चभूतसमुद्भूतान्येवं कर्मेन्द्रियाण्यपि ।
भौतिकान्येकतः प्रोक्तान्यन्यतोऽभौतिकान्यथ ।। ७३६ ।।

ज्ञानशक्तिक्रियाशक्तिद्वारेणैकैकभूततः ।
इन्द्रियद्विकमुद्भूतं पञ्च ते दश तान्यतः ।। ७३७ ।।

ज्ञानशक्त्या यथाऽऽकाशाच्छ्रोत्रमुत्पद्यते तथा ।
क्रियाशक्त्या समुत्पन्नं ततो वागिन्द्रियं किल ।। ७३८ ।।

त्वक्पाण्योरुद्भवो वायोस्तेजसो नेत्रपादयोः ।
जलाच्च रसनापाय्वोर्भुवो घ्राणव्युपस्थयोः ।। ७३९ ।।

यतो यस्य समुत्पत्तिस्तत्तथैव तदात्मकम् ।
कारणान्तर्गुणाः कार्येषूत्क्राम्यन्तीति नान्यथा ।। ७४० ।।

यदन्यत्रान्यदीयस्य धर्मस्य प्रत्यगुद्भवः ।
स्वस्वहेतुतया युक्तो न स स्वाभाविको गुणः ।। ७४१ ।।

तेजसि स्पर्शसम्भूतिर्वायुसंयोगतो यथा ।
जलादिष्वपि रूपादिप्रतीतिस्स्यात्तथाऽन्यतः ।। ७४२ ।।

एकतोऽन्यत्र संक्रान्तिर्गुणानां गोचरीकृता ।
अन्योन्यव्यापृतेस्तेषां सर्वत्र सहजा स्थितिः ।। ७४३ ।।

मनोविमर्शः

इन्द्रियेभ्यः परं प्रादुर्मनस्तत्प्रेरणाप्रदम् ।
प्राणद्वारीकृतञ्चैतद् द्रव्यमेकमभौतिकम् ॥ ७४४ ॥

महाभूतोत्थसत्त्वांशसमुद्भूतं सदद्भुतम् ।
रजोवत्सात्त्विकादस्मादहङ्कारादुपस्कृतम् ॥ ७४५ ॥

वायवीयमिवाधिक्यात्तद्गतेरनुमीयते ।
सर्वभूतांशसत्त्वेऽपि तदंशप्रगुणीकृतम् ॥ ७४६ ॥

परिमाणे त्वणु प्रोक्तं क्वचित्त्वापि च तद् विभु ।
तद्द्वयात्मकमित्येवं मतं तत्र पृथक् पृथक् ॥ ७४७ ॥

संशीतिर्निश्चितिस्तत्राभिमतिश्च स्मृतिस्तथा ।
चतस्रो वृत्तयस्तस्य मनसः संप्रकल्पिताः ॥ ७४८ ॥

संशीत्या तन्मनो नाम निश्चित्या बुद्धिरुच्यते ।
अभिमत्या त्वहङ्कारस्स्मृत्या चित्तमुदीर्यते ॥ ७४९ ॥

मनोबुद्धिरहङ्कारस्तदन्तःकरणं मतम् ।
संकल्पोऽध्यवसायश्चाहङ्कारश्चेति वृत्तयः ॥ ७५० ॥

जीवबोधस्वरूपं सन्मनोऽवस्थान्तरं न तत् ।
चित्तमित्युक्तमन्यस्मिन् दर्शने तन्न चान्यथा ॥ ७५१ ॥

मनोऽवस्थाविशेषेऽत्र विभिन्ना मतिरुद्भवेत् ।
तत्स्वरूपानुसन्धाने मतैक्यं सुदृढं सताम् ॥ ७५२ ॥

मननाद् यन्मनो नाम चेतनाच्चित्तमप्यदः ।
बुद्ध्यहङ्काररूपत्वं तत्परत्वान्न भिद्यते ॥ ७५३ ॥

यथैकस्मिन् शरीरेऽपि हस्तपादादिसंज्ञया ।
सम्भेदो दृश्यमानोऽपि न पृथक् पर्यवस्यति ॥ ७५४ ॥

वृत्तिभेदेन सम्भिन्नं वस्तुरूपप्रकल्पनम् ।
यथार्थं नेति मन्यन्ते तत्त्वमात्रानुयायिनः ॥ ७५५ ॥

विभिन्नभावेषु पृथक् पृथक् कृतं,
स्वरूपतो नैकविधं प्रकल्पितम् ।
यथार्थदृष्टया तु विवेकशालिनां,
न तत्त्वतो वस्तु विभिद्यते क्वचित् ॥ ७५६ ॥

अथ सप्तमः परामर्शः

ज्ञानविमर्शः

ज्ञानं चैतन्यमेवेति मनोमुख्यप्रयोजनम्।
विषयेन्द्रियसंयोगारोन तज्जन्यते किल ॥ ७५७ ॥

दृक्क्रियाशक्तिमज्ज्ञानं प्रत्यक्षं चापरोक्षकम्।
प्रत्यक्षे त्वन्यसम्बन्धः परोक्षे केवलं मनः ॥ ७५८ ॥

इन्द्रियैस्तु मनस्स्पृष्टं विषयैरिन्द्रियाण्यपि।
मनसा चात्मनो योगस्तेन ज्ञानस्य सम्भवः ॥ ७५९ ॥

निराकारमनित्यञ्च विशिष्टो गुण आत्मनः।
मनोजन्यमिदं नित्यमीश्वरीयं तु केवलम् ॥ ७६० ॥

मतं न्यायविदामेतद्, विशिष्टाद्वैतिनस्तु तत्।
द्विविधं नित्यमित्याहुर्विशेषस्तु स्वभावजः ॥ ७६१ ॥

यच्च बोधमयं चित्तं विषयेन्द्रिययोगतः।
घटादीन् भासयत्याशात्तज्ज्ञानं दर्शनान्तरे ॥ ७६२ ॥

बाह्यमाभ्यन्तरं रूपं घटादेर्वस्तुनो द्विधा।
पूर्वमाहरणाद्यर्हं लौकिकं कार्यमाचरेत् ॥ ७६३ ।

अन्यदाभ्यन्तरं यत्तद् विषयेन्द्रियसंयुतम्।
मानसानुगतं ज्ञानमिदं वैभाषिकं मतम् ॥ ७६४ ॥

पूर्वसंस्कारतश्चायं विज्ञानस्कन्ध एव सः।
घटाद्याकारसम्बन्धाज्ज्ञानं विज्ञानवादिनाम् ॥ ७६५ ॥

तस्य साकाररूपत्वात्क्षणिकत्वादनित्यता।
तत्त्वमन्यादृशं चैतन्मेनिरे सर्वलिङ्गिनः ॥ ७६६ ॥

इदं मानसिकं नाम परिणामविशेषकम् ।
अव्ययं व्यापकं ज्ञानं माध्वाचार्यानुमोदितम् ॥ ७६७ ॥

प्रतिविम्बेन संयुक्तं मनोवृत्तेरशेषतः ।
आत्मचैतन्यमेवैतज्ज्ञानं पातञ्जलोदितम् ॥ ७६८ ॥

हृत्प्रदेशे घटाद्यर्थैरिन्द्रियैश्च समन्वयात् ।
मनः परिणतिर्ज्ञानं वृत्तिरूपं परे जगुः ॥ ७६९ ॥

विषयोपनिबद्धो यो मनोदेशस्तदुद्भवः ।
परिणामोऽत्र तज्ज्ञानं सांख्यदर्शनसङ्गतम् ॥ ७७० ॥

विषयान्तर्गतं तत्र तदाकारतया मनः ।
भासते, वृत्तिसम्बन्धादात्मचैतन्यमेव तत् ॥ ७७१ ॥

मूर्तामूर्तमिदं सर्वं जगद् व्याप्य प्रतिष्ठितम् ।
आत्मतत्त्वञ्च तद्रूपं चैतन्यं ज्ञानलक्षणम् ॥ ७७२ ॥

सोपाधिकमनित्यञ्च नित्यं स्यान्निरुपाधिकम् ।
वृत्तिमत्त्वेन साकारं निराकारं तदन्यकम् ॥ ७७३ ॥

सविकल्पकमित्यथञ्च निर्विकल्पकमित्यथ ।
वृत्त्यवृत्तितया ज्ञानं प्राहुरद्वैतिनो बुधाः ॥ ७७४ ॥

ज्ञानमेकमनुस्यूतं निराकारमथाव्ययम् ।
चिन्मयं परमं तत्त्वं सदित्येतत्प्रमाणितम् ॥ ७७५ ॥

शब्दाद्यनुमितिद्वारा जायमानं परोक्षकम् ।
चक्षुरुन्मीलनात्प्रत्यक् प्रत्यक्षं तत्प्रकीर्तितम् ॥ ७७६ ॥

ज्ञानमस्तीति चिद्रूपं प्रकाशमयमव्ययम् ।
संविदाकारमुद्भिन्नमेकमित्यत्र नो भिदाः ॥ ७७७ ॥

वस्तुभेदाद् यदानन्त्यं तदप्यस्य न दूषणम् ।
स्वत्त्वेनैकत्वसंसिद्धिर्नात्र वैमत्यमुन्नयेत् ॥ ७७८ ॥

सत्त्वतो भासमानानां वस्तूनामेकधर्मिता ।
धर्मेषूद्भिद्यमानेषु तदनैक्यं प्रतीयते ॥ ७७९ ॥

एकत्वमवसातव्यमनेकत्वमथापि वा ।
सत्तासार्थक्यसिद्धान्ताद् दर्शनेष्वेकवाक्यता ।। ७८० ।।

नास्तिकास्तिकयोर्भेदस्तत्र सम्यङ् न युज्यते ।
अर्थतश्चैकमत्येन वस्तुतत्त्वावधारणात् ।। ७८१ ।।

क्वचिद् ब्रह्म क्वचिच्छून्यं क्वचिद्द्वैतं क्वचिन्न तत् ।
क्वचिच्चान्यदिति प्रायोवादास्सत्तत्त्वदर्शिनाम् ।। ७८२ ।।

यच्छून्यं तद् भवेद् ब्रह्म यद् ब्रह्म द्वैतमस्तु तत् ।
विशिष्टमविशिष्टं वा सदेकं तन्न संशयः ।। ७८३ ।।

कर्माकर्मगतिस्तत्र दृष्टादृष्टानुबन्धिनी ।
धर्माधर्मानुसम्बन्धस्सत्यासत्यानुरोधतः ।। ७८४ ।।

सूक्ष्मतस्स्थूलमुद्भूतं भौतिकाभौतिकं किल ।
नाम रूपादिभिन्नं तत्, सत्त्वात्तत्त्वाच्च नो पृथक् ।।७८५।।

सत्त्वं तत्त्वानुरोधेन तत्त्वं सत्त्वानुसन्धया ।
अद्वयं तद्द्वयं नाम विशिष्यैतद् विधीयते ।। ७८६ ।।

पदार्थविमर्शः

चेतनाचेतनत्वेन पदार्था द्विविधा मताः ।
ततोऽवान्तरभेदैस्ते भूयांसः परिकल्पिताः ॥ ७८७ ॥

औलूक्ये सप्तसंख्याका द्रव्यरूपा नवाङ्किताः ।
पञ्चविंशतिरुद्गीता गुणाः कर्माणि पञ्च च ॥ ७८८ ॥

सामान्यं द्विविधं किञ्च विशेषोऽनन्तभेदकः ।
नित्यद्रव्याश्रितश्चैवं समवायोऽद्वयो मतः ॥ ७८९ ॥

चतुर्धाऽभिमतोऽभावस्संक्षिप्यैते निर्दर्शिताः ।
विस्तरेण समाख्याता यतो ह्यन्यत्र दर्शने ॥ ७९० ॥

षोडशाङ्काः पदार्थास्ते ये च न्यायनयोदिताः ।
सप्तान्तर्भाविताास्तत्र नामतो व्याकृता अपि ॥ ७९१ ॥

दृष्टान्तेनार्थसंसिद्धिस्सर्वसिद्धान्तसम्मता ।
साधर्म्याच्चाथ वैधर्म्यात्सोऽपि द्वेधा विभज्यते ॥ ७९२ ॥

दृष्टोऽन्तो निश्चयो येन स दृष्टान्तः प्रकीर्तितः ।
प्रमाणेष्वखिलेष्वेष जीवनाधायको मतः ॥ ७९३ ॥

प्रतिज्ञाहेतुदृष्टान्तनिगमोपनयेष्वयम् ।
परार्थानुमितेश्चैषु पञ्चाङ्गेषु विशिष्यते ॥ ७९४ ॥

पञ्चावयवसंवादे मतिर्भिन्ना मनीषिणाम् ।
किन्तु दृष्टान्तसाङ्गत्यं सर्वैरङ्गीकृतं किल ॥ ७९५ ॥

विशिष्यानुमितेः प्राणप्रदो दृष्टान्त उम्भितः ।
वस्तुतत्त्वपरिज्ञानं नान्यथा सूपपद्यते ॥ ७९६ ॥

पूर्वाभिज्ञानविज्ञातान् पदार्थानन्तरेण सः ।
दृष्टान्तो नोपयुज्येत वस्तुतत्त्वोपपत्तये ॥ ७९७ ॥

आत्यन्तिकतया दुःखान्निवृत्तिस्तदभिज्ञया ।
सैव मुक्तिरिति न्याये तद्विदामनुमोदिता ॥ ७९८ ॥

प्रेत्यभावस्तु तत्रैको दुःखहेतुः पुनः पुनः।
गर्भवासाज्जनिप्राप्तिस्वरूपोऽसौ निरूपितः ॥ ७९९ ॥

तद्भोगेच्छात्मिका तत्र प्रवृत्तिर्मूलमुच्यते।
तस्या हेतुरसौ दोषो रागद्वेषादिलक्षणः ॥ ८०० ॥

कारणं तस्य दोषस्य मिथ्याज्ञानं भ्रमात्मकम्।
यथार्थज्ञानसन्धानात्तन्निवृत्तिर्भवेद् ध्रुवम् ॥ ८०१ ॥

प्रमेयार्थपरिज्ञानं प्रमाणैकप्रयोजनम्।
दृष्टान्तप्राणवत्तत्रानुमानं तत्त्वबोधकम् ॥ ८०२ ॥

तर्कस्तत्र प्रयोक्तव्यस्संशयं भेत्तुमिच्छया।
पक्षद्वितयसम्भूते वादे स्यान्निर्णयो दृढः ॥ ८०३ ॥

वादान्तानां पदार्थानां निश्चयो नूनमन्ततः।
तत्स्वरूपानुसंवित्तिस्तेन मोक्षोपयोगिनी ॥ ८०४ ॥

भुक्तिमुक्तिप्रदातृत्वाद् दुःखबन्धप्रणाशकाः।
न्यायवैशेषिकप्रोक्ताः पदार्थास्ते व्यवस्थिताः ॥ ८०५ ॥

चार्वाकादिमतविमर्शः

प्रत्यक्षेणोपलम्भेन पृथिव्यब्वायुतेजसाम् ।
चार्वाकस्याभिसम्मत्या पदार्थास्ते चतुर्विधाः ॥ ८०६ ॥

चतुर्णां तत्पराणूनां जगदुत्पत्तिहेतुता ।
तद्भिन्नं किञ्चिदप्यन्यन्नास्तीत्येषां दृढा मतिः ॥ ८०७ ॥

प्रत्यक्षं भौतिकं यच्च तत्सत्यं नेतरत्क्वचित् ।
दृष्टयोगप्रयोगेषु दृष्टिरेषा परिष्कृता ॥ ८०८ ॥

भूतविज्ञानवादानां सोऽयमाद्यप्रवर्तकः ।
तत्पथानुगतेर्नूनं भौतिकं जगदुन्नतम् ॥ ८०९ ॥

नैकाधुनिकयन्त्राणां निर्माणं दृष्टयोगतः ।
तत्प्रयोगानुसन्धानान्नूनं वैज्ञानिकी स्थितिः ॥ ८१० ॥

चन्द्रशुक्रग्रहादीनां याननिर्याणकक्रिया ।
दृश्यमानाऽखिलाऽप्येषा तन्मनीषाफलायिता ॥ ८११ ॥

नाभविष्यदसौ विज्ञो भूतसाक्षात्कृदग्रणीः ।
नासेत्स्यत्तद्ध्रुवं लोके विज्ञानं भौतिकं खलु ॥ ८१२ ॥

दृष्टमायतनं सृष्टं वपुर्यत्तत्सुखार्थिनाम् ।
तदेकान्ततयाऽऽश्लिष्टं सिद्धान्तेनामुनाऽधुना ॥ ८१३ ॥

पदार्थानां निजार्थत्वप्रतिष्ठानोपकल्पनात् ।
श्रेयानाध्यक्षिको मार्गस्स्थूलभूतार्थदर्शकः ॥ ८१४ ॥

अदृष्टत्वे तदाध्यक्ष्यं मतं नैवोपयुज्यते ।
दृष्टत्वे तूपयुज्येत नामरूपाभिकल्पने ॥ ८१५ ॥

चार्वाकर्षिप्रणीतं तद् यच्च सांदृष्टिकं मतम् ।
भूतविज्ञानसंसारसारवत्संप्रतीयते ॥ ८१६ ॥

याथार्थ्यं तेन तत्रोद्यद्वस्त्वभिज्ञानदर्शनात् ।
रहस्स्थानीयभावानामतथात्वमुरीकृतम् ॥ ८१७ ॥

न प्रपञ्चस्य मिथ्यात्वं न वा सांवृतिकोऽप्यसौ ।
दृश्यत्वेनानुभूतत्वात्प्रयोगत्वेन भासनात् ॥ ८१८ ॥

सुखस्यौपयिकं सर्वं दृष्टिसंसर्गसंयुतम् ।
तत्प्रयोगानभिज्ञानाद् दुःखमेतदतद्विदाम् ॥ ८१९ ॥

इत्थं तद् गोचरीभूतं जगदेतत्प्रयोगसत् ।
उक्तमाध्यक्षिकन्यायाद् युक्तिमत्सम्प्रतीयते ॥ ८२० ॥

बौद्धादिमतभेदविमर्शः

भावानां निस्स्वभावत्वात्प्रत्ययेष्वप्रवर्तनात् ।
शून्यमेवेति मन्यन्ते बौद्धेष्वेके तु माध्यमाः ॥ ८२१ ॥

दुःखनाशैकमूलत्वाच्छून्यमेवावलम्बनम् ।
यत्किञ्चित्कल्पनीयत्वे भयं नोच्छिद्यते यतः ॥ ८२२ ॥

सर्वसंकल्पनामात्रस्वरूपं शून्यमिष्यते ।
प्रपञ्चोपशमस्तेन तदेकं पारमार्थिकम् ॥ ८२३ ॥

कुतोऽप्यभिनिवेशश्चेत्ततो दुखं विवर्धते ।
शून्यसत्त्वाभिसंलापो यतस्तैस्सम्प्रसाध्यते ॥ ८२४ ॥

पदार्थत्वेन तच्चैकं शून्यमेव निरात्मकम् ।
तद्भिन्नं नावशिष्येत किञ्च क्वचन किञ्चन ॥ ८२५ ॥

एष त्वद्वैतसंवादी पक्षो नामैकभेदवान् ।
सर्वमिथ्यात्ववादेन सर्वशून्यत्वमैक्यवत् ॥ ८२६ ॥

विज्ञानस्कन्ध एवैको योगाचारमतानुगैः ।
पदार्थोऽङ्गीकृतो मूलं तत्त्वमन्यन्न तत्पृथक् ॥ ८२७ ॥

तेषु सौत्रान्तिकाश्चैके तथा वैभाषिकाः परे ।
बाह्यमाभ्यन्तरं तत्त्वद्वयं स्वीकुर्वते हि ते ॥ ८२८ ॥

रूपविज्ञानसंस्कारवेदनास्संज्ञया सह ।
पञ्चैते चान्तरा भावास्तत्त्वरूपा निरूपिताः ॥ ८२९ ॥

पृथिव्यब्वायुतेजोऽन्तस्सूक्ष्मांशाः परमाणवः ।
बाह्यास्तत्त्वस्वरूपास्ते पदार्थाः परिकीर्तिताः ॥ ८३० ॥

सर्वमौत्पत्तिकं चैतत्सत्यं स्यात्सामुदायिकम् ।
निरुद्धं क्षणिकं सर्वं सत्यं नैरोधिकं च तत् ॥ ८३१ ॥

शून्यमेवाखिलं सर्वं दुःखसत्यमुदीरितम् ।
मार्गसत्यमिदं प्रोक्तं सर्वमेतन्निरात्मकम् ।। ८३२ ।।

एवमङ्गीकृतं बौद्धैरार्यसत्यचतुष्टयम् ।
अप्रहीणमनुच्छिन्नं निर्वाणं तत्परं पदम् ।। ८३३ ।।

वस्तुतोऽवस्तुरूपास्ते भावाभावविलक्षणाः ।
पदार्थास्साम्वृतास्सर्वे सौगतैरभिसम्मताः ।। ८३४ ।।

जीवोऽजीव इति द्वेधा मूलतत्त्वद्वयं ततः ।
तत्प्रपञ्चेन किञ्चान्ये पदार्था आर्हकैस्स्तुताः ।। ८३५ ।।

पुद्गलो जीव आकाशं धर्मोऽधर्मस्तथाऽऽस्रवः ।
संवरो निर्जरो बन्धो मोक्ष एते दशाङ्किताः ।। ८३६ ।।

विज्ञानादपृथग्भूतं, मानसं नैव किञ्चन ।
अन्तरातीतविज्ञानं स्कन्धरूपं मनोमयम् ।। ८३७ ।।

स्कन्धो राशिरिति प्रोक्तोऽथवा राशीकृतोऽर्जितः ।
प्रज्ञप्तिमात्रतासिद्धः पदार्थः प्रत्यभिश्रुतः ।। ८३८ ।।

रूपमाकार इत्येवं विज्ञानं संविदुत्तमा ।
संस्कारो वासना संज्ञाऽभिधा वित्तिश्च वेदना ।। ८३९ ।।

विशेषः—उपर्युक्तं कारिकात्रयं सौगतमताभिसम्बद्धं पञ्चान्तरतत्त्व-व्याख्यानरूपमवसेयम् ।

चेतनोत्प्रेरको द्रव्यात्मकस्सम्यक् परिष्कृतः ।
जडानां परमाणूनां पुञ्जरूपस्स पुद्गलः ।। ८४० ।।

चेतनो जीव इत्युक्तोऽजीवस्सोऽचेतनो जडः ।
सहचारस्तयोर्लोकस्तावुभौ शाश्वतौ मतौ ।। ८४१ ।।

संवरः पापसंरोधो निर्जरः कर्मसंक्षयः ।
आस्रवः क्लेश आसक्तिर्बन्धो मोक्षस्तु निर्वृतिः ।। ८४२ ।।

स्यादनेकान्तवादोऽयं भावाभावोभयात्मकः ।
वाच्योऽपि स्यादवाच्योऽपि वाच्यावाच्योऽपि विश्रुतः ।। ८४३ ।।

सर्वं सम्भाव्यते सत्यमसत्यं चापि न द्वयम् ।
सदसद्वादसंश्लिष्टस्स्याद्वादोऽयं प्रतिष्ठितः ॥ ८४४ ॥

हिंसावृत्तिपरित्यागपराकाष्ठामधिश्रितः ।
निर्ग्रन्थश्रेणिलेश्यान्तर्गतस्सिद्धान्त आर्हकः ॥ ८४५ ॥

निर्ग्रन्थो बन्धराहित्यं लेश्या सैषा विचारणा ।
परिणामोऽवसायश्च तदर्थस्स्यादनुक्रमात् ॥ ८४६ ॥

निर्ग्रन्थीयप्रवचनं लेश्यान्तं शास्त्रमार्हतम् ।
सम्यग् ज्ञानेन बन्धस्य प्रमोषाय प्रकल्पते ॥ ८४७ ॥

रामानुजाचार्यमतविमर्शः

सप्रमाणप्रमेयत्वप्रकारेण द्विधा मतः।
पदार्थप्रकरो भूयान् विशिष्टाद्वैतवादिनाम् ॥ ८४८ ॥

दृष्टशब्दानुमानाख्यं प्रमाणत्रयमीप्सितम्।
प्रमेयत्वेन च द्रव्यं गुणस्सामान्यमिष्यते ॥ ८४९ ॥

ईशो जीवो विभूतिश्च ज्ञानं च प्रकृतिस्तथा।
कालश्चाङ्गी कृतं तत्र द्रव्यषट्कमनन्यकम् ॥ ८५० ॥

सत्त्वं रजस्तमश्शब्दस्स्पर्शो रूपं रसोऽपि च।
गन्धो योगश्च शक्तिश्च गुणाश्चैते दशादृताः ॥ ८५१ ॥

प्रधानं त्रिगुणं यत्तत्सैव प्रकृतिराश्रिता।
सामान्यं सम्मतं चैतत्तत्र द्रव्यगुणात्मकम् ॥ ८५२ ॥

परो व्यूहश्च विभवोऽन्तर्याम्यर्चावतारकः।
तथा नारायणश्चैवमीश्वरः पञ्चधा मतः ॥ ८५३ ॥

परो मुक्तैरभिध्येयो व्यूहस्तत्र चतुर्विधः।
संकर्षणो वासुदेवः प्रद्युम्नश्चानिरुद्धकः ॥ ८५४ ॥

एकस्यैवेश्वरस्यैते प्रभेदा जगतः कृते।
सृष्टिस्थितिविनाशार्थमर्चनार्थं च कल्पिताः ॥ ८५५ ॥

ज्ञानं बलमथैश्वर्यं वीर्यं शक्तिश्च तेजसा।
सममेभिर्गुणैः षड्भिर्वासुदेवस्समेधितः ॥ ८५६ ॥

ज्ञानमेतद् बलञ्चेति द्वयं संकर्षणे तथा।
प्रद्युम्ने वीर्यमैश्वर्यं तेजश्शक्त्यनुरुद्धके ॥ ८५७ ॥

मत्स्यकूर्मादिरूपेणावतारो विभवो हि सः।
सर्वान्तर्गामिता यस्य सोऽन्तर्यामीति संस्तुतः ॥ ८५८ ॥

नियन्ता चैष जीवानां सम्यङ् नियमनादपि ।
समाधौ योगिभिश्चास्य साक्षात्कारो विधीयते ।। ८५९ ।।

मन्दिरेष्वर्चितास्तत्र मन्त्रैस्सम्यक् प्रतिष्ठिताः ।
संस्कृताः प्रतिमा ह्यर्चावताराख्या विशेषिताः ।। ८६० ।।

जीवोऽसावीश्वराधीनो नित्यो भिन्नशरीरगः ।
बद्धोऽप्येषोऽक्षयी किञ्च स्ववृत्तिवशतो वृतः ।। ८६१ ।।

बद्धोऽसौ संसृतौ सुस्थो मुक्तो वैकुण्ठमाश्रितः ।
जगदस्पर्शवानेषोऽव्ययश्चेत्यनुगीयते ।। ८६२ ।।

वैकुण्ठे धाम्नि सम्पृक्ता अनन्तगरुडादयः ।
दिव्याश्चैतेऽभिधीयन्ते तत्र नित्यविभूतयः ।। ८६३ ।।

चिद्रूपा स्वप्रकाशा धीर्ज्ञानं, कालो विभुर्जडः ।
जगदेकाश्रयश्चायं जन्यजीवनिबन्धनः ।। ८६४ ।।

गुणा द्रव्याश्रिताः, सत्त्वगुणश्शुद्धश्च मिश्रितः ।
सद्विभूत्याश्रितश्शुद्धो मिश्रितः प्रकृतिं गतः ।। ८६५ ।।

पञ्चभूतेष्वनुस्यूतो गुणशब्द इति स्मृतः ।
स्पर्शो रूपं रसो गन्धस्त एते स्युश्चतुर्गुणाः ।। ८६६ ।।

द्रव्यषट्कस्थसामान्यं संयोगोऽव्याप्यवृत्तिकः ।
सर्वहेत्वेकहेतुत्वप्रणेत्री शक्तिरिष्यते ।। ८६७ ।।

तत्सामान्यं गुणो नाम सत्त्वज्ञानप्रभात्रयम् ।
गुणद्रव्यात्मकं द्रव्याश्रयान्नाशाद्विकासनात् ।। ८६८ ।।

एवं संक्षेपतो रामानुजाचार्यमनीषिणः ।
विशिष्टाद्वैतिनः प्रोक्ताः पदार्थास्तन्मतादृताः ।। ८६९ ।।

श्रद्धासंस्कारसम्पन्नस्सम्प्रदायोऽयमास्तिकः ।
समत्वानतिरिक्तश्च श्रेयान् तत्त्वावबोधकः ।। ८७० ।।

विशिष्याद्वैतमिच्छन्ती सैषाऽमुष्य परम्परा ।
ध्यानार्चापावनी शश्वत्स्वात्मयोगोपयोगिनी ।। ८७१ ।।

वैषम्यं लौकिकं वास्तु तदस्त्वाध्यात्मिकं नु वा?।
सत्यसाक्षात्कृतौ नूनं सर्वथा तत्तु बाधकम् ॥ ८७२ ॥

श्रद्धार्चाध्यानसन्धानसुखमुक्त्यादिकाशयाः ।
भावास्साम्यानुरोधेन कदाचिन्नो विरोधिनः ॥ ८७३ ॥

समत्वस्योपयोगित्वं साध्ये सर्वत्र युज्यते ।
यतस्तत्परमं सत्यं साध्यमात्रैकजीवितम् ॥ ८७४ ॥

यच्च तद्रोधकं किञ्चित्क्वचिद् भेदाय कल्प्यते ।
तन्न वास्तविकं तत्र कल्पकस्य मतिभ्रमः ॥ ८७५ ॥

माध्वमतविमर्शः

समवायं विना द्रव्यादयो ये षट् प्रकीर्तिताः ।
सविशिष्टांशिसच्छक्तिसादृश्यास्ते दश स्मृताः ॥ ८७६ ॥

परात्मा श्रीस्तथा जीवोऽव्याकृतद्यौः प्रधानकम् ।
गुणत्रयं महत्तत्त्वमहङ्कारोऽथ धीर्मनः ॥ ८७७ ॥

समात्रेन्द्रियभूतानि ब्रह्माण्डं चाप्यविद्यया ।
वर्णोऽन्धकृद् वासना च कालश्च प्रतिविम्बकम् ॥ ८७८ ॥

विंशतिश्चात्र संख्याता द्रव्याणां च गुणाश्च ते ।
नैकधा सन्ति भूयांसो नामख्याता यथाक्रमम् ॥ ८७९ ॥

निषिद्धं विहितं किञ्चोदासीनं कर्म च त्रयम् ।
नित्यानित्यप्रभेदेन सामान्यं द्विप्रकारकम् ॥ ८८० ॥

भेदाभावेऽपि भेदस्य तद्विशेषः प्रयोजकः ।
समवायस्तु नैवेष्टो पदार्थान्तरतामितः ॥ ८८१ ॥

विशेष्याकार एवासौ विशिष्टोऽयं विशेषणात् ।
आकाशोंऽशी तथा वस्त्रादिकं हस्तादिमापितम् ॥ ८८२ ॥

अचिन्त्याधेयसहजास्सपदाशशक्तयश्च ताः ।
तन्निरूपिततन्निष्ठो धर्मस्सादृश्यहेतुकः ॥ ८८३ ॥

प्रागभावादिकोऽभावश्चतुर्धाऽव्याकृतं नभः ।
दिग्रूपं नित्यमस्पृष्टं सर्गान्ताभ्यामभौतिकम् ॥ ८८४ ॥

प्रधानं सृष्ट्युपादानं सत्त्वादि स्याद् गुणत्रयम् ।
तदुपादानमुद्भिन्नं महत्तत्त्वमहङ्कृतिः ॥ ८८५ ॥

सत्त्वज्ञानमयी बुद्धिर्द्विधा प्राग्द्रव्यरूपिणी ।
तत्त्वातत्त्वात्मकं द्वेधा मनः पूर्वं तु पञ्चधा ॥ ८८६ ॥

मनो बुद्धिरहङ्कारश्चित्तमेवं च चेतना।
तत्र वैकारिकाहङ्कारजं तत्त्वात्मकं मतम् ॥ ८८७ ॥

यत्त्वतत्त्वात्मकं तत्स्यादिन्द्रियं केवलं मनः।
पञ्चेन्द्रियाणि तन्मात्राश्शब्दस्पर्शादयश्च ते ॥ ८८८ ॥

द्युवाताग्न्यम्बुभूत्पत्तिस्तन्मात्राभ्यस्स्मृता क्रमात्।
ता इमाः पञ्चभूतानि तत्कार्यं निखिलं जगत् ॥ ८८९ ॥

मोहरूपा महामोहमयी तामिस्रुरूपिणी।
अन्धतामिस्रसंकाशा तथा व्यामोहकारिणी ॥ ८९० ॥

जीवस्याच्छादिका किञ्च परमाच्छादिकाऽप्यथ।
शैवला चापि मायेति ह्यविद्या नवधा मताः ॥ ८९१ ॥

ताश्च जीवाश्रिता, वर्णाश्चैकपञ्चाशदङ्किताः।
अन्धकारश्च नो तेजोऽभावो न्यायादिवन्मतः ॥ ८९२ ॥

स्वप्नोपादानभूताऽसौ वासना परिकीर्तिता।
कालश्च व्यापको नित्यो विश्वायुष्यप्रमाणकः ॥ ८९३ ॥

विना विम्बमथास्थायि प्रतिविम्बं तु तत्समम्।
गुणा दोषेतरास्तेषामन्तर्भेदोऽन्यतन्त्रवत् ॥ ८९४ ॥

अणु मध्यं महत् त्रेधा परिमाणमुरीकृतम्।
स्वनिरूपकताभेदात्संयोगो भिन्नरूपकः ॥ ८९५ ॥

वेगहेतुर्लघुत्वं स्यान्मृदुत्वं मृदुतामयम्।
काठिन्यं क्लिष्टताऽन्योन्याभावो नाम पृथक्त्वकम् ॥ ८९६ ॥

पञ्चभूतगुणश्शब्दो ध्वनिर्ज्ञानञ्च धीरियम्।
प्रत्यक्षश्चानुमानोत्थशशाब्दश्चानुभवस्त्रिधा ॥ ८९७ ॥

बुद्धिदुःखसुखेच्छेर्ष्याप्रयत्नाश्च मनोगताः।
तद्धर्मास्तेऽप्यनित्याश्च संस्कारश्च चतुर्विधः ॥ ८९८ ॥

भावना योग्यता वेगस्स्थितिस्थापक इत्यसौ।
प्रकाशश्चैष आलोकश्शमो धीरीश्वरार्पिता ॥ ८९९ ॥

कृपारूपा दया चेयं मनोनिग्रहणं दमः ।
तितिक्षाऽशेषदुःखोत्थद्वन्द्वक्लेशसहिष्णुता ॥ ९०० ॥

बलं कार्यानुकूलं यच्चान्यसाहाय्यमन्तरा ।
भयं भीतिश्शुचित्वं च शौचमित्यादयो गुणाः ॥ ९०१ ॥

उत्क्षेपणादिकं कर्म तदेतच्चलनात्मकम् ।
मनुष्यत्वादिसामान्यं तदनित्यं पृथक् पृथक् ॥ ९०२ ॥

नित्यं नित्यगतं चेत्थं स्यादनित्यमनित्यगम् ।
जातिरूपं तथोपाधिस्वरूपं द्विविधश्च तत् ॥ ९०३ ॥

तथैवायं विशेषोऽपि पदार्थो द्विविधो मतः ।
नित्येशादिगतो नित्योऽनित्योऽनित्यघटादिगः ॥ ९०४ ॥

सर्वज्ञत्वं विशिष्टत्वादिकं सर्वं तथा द्विधा ।
अंशस्त्ववयवोंऽशी चावयवी तद्विशेषितः ॥ ९०५ ॥

परमेशेऽखिला शक्तिस्तद्भिन्नस्था निजाश्रयात् ।
नानाकारतया सैषा परिव्याप्यावतिष्ठते ॥ ९०६ ॥

मन्त्रैश्चाधिष्ठिताऽऽधेया प्रतिमादौ निवेशिता ।
स्वभावे सहजा शब्दे वाच्यवाचकयोगजा ॥ ९०७ ॥

नित्यं तज्जीवसादृश्यं तदन्यत्तदनित्यकम् ।
प्रागध्वंसात्यन्तिकाभावत्रयं भिन्नश्च धर्मिणः ॥ ९०८ ॥

धर्मिरूपो मतोऽन्योन्याभावस्ततसमरूपतः ।
नित्यात्मकतयाऽभावो नित्योऽनित्यस्तदन्यथा ॥ ९०९ ॥

शशशृङ्गादिकाभावस्स स्यादात्यन्तिकस्तथा ।
घटादेः प्रागभावोऽयं, तदेतन्माध्वदर्शनम् ॥ ९१० ॥

संक्षिप्यानूदितं चैतन्माध्वाचार्यसमर्थितम् ।
सम्प्रदायानुरोधेन मतं भिन्नमिव स्थितम् ॥ ९११ ॥

उच्चितानां पदार्थानां तेषां नानार्थदर्शिनाम् ।
तत्त्वतस्तुल्यरूपाणां साम्यमेवावसीयते ॥ ९१२ ॥

सम्प्रदायो न भिन्नार्थस्सूपदेशविधिश्च सः ।
मार्गो वाऽसौ गुरूद्दिष्टस्तत्र तत्त्वं निगूहितम् ॥ ९१३ ॥

सिद्धान्तस्त्वेक एवायं साम्यतत्त्वानुशीलनम् ।
तत्र भेदो न विज्ञानां विवादो वाग्विजृम्भणम् ॥ ९१४ ॥

सम्प्रदायोऽपि भेदार्थः क्वचिन्नैवोपदेशितः ।
साम्यतत्त्वैकदृष्टीनां स आम्नायस्सदागमः ॥ ९१५ ॥

नैकरूपेष्वनुस्यूतो नैकधा संविभाजितः ।
नैकभावाश्रितोऽप्येष साम्यमेवानुवर्तते ॥ ९१६ ॥

श्रुतिस्मृत्यादिशास्त्राणां पन्थानस्साम्प्रदायिकाः ।
वादभिन्ना विभान्तोऽपि साम्यमात्रोपदेशकाः ॥ ९१७ ॥

सन्दिहाना विनश्यन्ति सन्देहो जातु न क्वचित् ।
दर्शनेषु प्रभिन्नेष्वप्यभिन्नं साम्यमद्भुतम् ॥ ९१८ ॥

तेन माध्वमतोद्दिष्टं सर्वं साधु समञ्जसम् ।
आस्थाऽनास्थाकृतो भेदस्समत्वे पर्यवस्यति ॥ ९१९ ॥

यच्च पूर्णं स्वरूपेण यच्च सत्यं सदन्ततः ।
यत्र तत्त्वानुसन्धानं तत्र साम्यनिदर्शनम् ॥ ९२० ॥

सदसद्वस्तुभेदेन समस्तं प्रविभाजितम् ।
समीकृत्यानुपश्यन्तः क्वचिन्मुह्यन्ति नो बुधाः ॥ ९२१ ॥

सदेकमेवास्तु तथाऽसदस्तु वाऽ
प्यथोभयं वास्तु किमप्यनूदितम् ।
समूहितं सर्वमशेषभावतः,
समश्नुते साम्यकलामनाविलाम् ॥ ९२२ ॥

अथाष्टमः परामर्शः

माहेश्वरादिमतविमर्शः

एषु माहेश्वरेष्वेके नकुलीशास्तथा परे ।
प्राज्ञाः पाशुपताश्चान्ये शैवाः केचिद् रसेश्वराः ॥ ९२३ ॥

प्रत्यभिज्ञार्थिनोऽभिज्ञाः केऽपि चैते विपश्चितः ।
भिन्नां भिन्नां मतिं स्वीयामाविश्चक्रुस्समेऽपि ते ॥ ९२४ ॥

तत्र पाशुपताश्चैवं नकुलीशास्सदृग्दृशः ।
तन्मते पञ्चसंख्याकाः पदार्थाः परिकीर्तिताः ॥ ९२५ ॥

कार्यं च कारणं योगो विधिर्दुःखान्त इत्यमी ।
तत्र कार्यं पराधीनं कारणैकसमाश्रयात् ॥ ९२६ ॥

कला विद्या पशुश्चेति–प्रभेदात्तत्पुनस्त्रिधा ।
कला चाचेतनं वस्तु विद्या जीवगुणस्तथा ॥ ९२७ ॥

भूयस्तद् द्विविधं प्रोक्तं कार्यकारणभेदतः ।
पञ्चभूतास्तथा पञ्चतद्गुणाश्चेति तद्दश ॥ ९२८ ॥

पञ्चज्ञानेन्द्रियाण्येवं पञ्चकर्मेन्द्रियाण्यपि ।
त्रिधाऽन्तःकरणश्चेति कारणं तत्त्रयोदश ॥ ९२९ ॥

स्वतन्त्रं कारणं तत्र केवलः परमेश्वरः ।
जीवेशयोश्च सम्बन्धो योग इत्यभिधीयते ॥ ९३० ॥

धर्मार्थसाधकश्श्रेष्टो विधिस्सम्यक्प्रयोजनः ।
दुःखान्तो मोक्ष इत्युक्तस्संसारक्लेशनाशकः ॥ ९३१ ॥

पतिः पाशः पशुश्चेति पदार्थत्रयवादिनः ।
शैवास्तत्र पतिश्चैकश्शिवो जीवः पशुर्मतः ॥ ९३२ ॥

मलं कर्म च माया च रोधशक्तिरिति क्रमात् ।
चतुर्धा पाश आख्यातस्तदन्यत्तु यथोदितम् ॥ १३३ ॥

जीवात्मपरमात्मैक्यं प्रत्यभिज्ञानदर्शने ।
जडवर्गस्तु सर्वोऽपि तथैवाङ्गीकृतोऽत्र सः ॥ १३४ ॥

आत्मनस्त्वेष भिन्नोऽपि तथाऽभिन्नोऽपि सम्मतः ।
अन्यच्चाद्योक्तवत्सर्वं यथास्वं प्रतिपादितम् ॥ १३५ ॥

पदार्थाश्चाभ्युपेता ये ते रसेश्वरदर्शने ।
इमे सर्वेऽपि तादृक्षा 'रसीभावप्रथा' पृथक् ॥ १३६ ॥

शिवस्तेषां परं तत्त्वं समाराध्यो महेश्वरः ।
परा माया शिवा शक्तिस्तदेकान्ताधिकारिणी ॥ १३७ ॥

शाक्तास्तेष्वेव सन्त्येके मार्गास्तेषां पृथक् पृथक् ।
दक्षिणाध्वाश्रिताः केचित् केऽपि ते वाममार्गिणः ॥ १३८ ॥

तान्त्रिकाश्चोभयेऽप्येते भिन्नस्तूपासनाविधिः ।
रहस्यान्तस्स्थिता तेषां प्रावर्तनीयं परम्परा ॥ १३९ ॥

तत्र तत्र प्रभिन्नेषु सम्प्रदायेषु संकुलः ।
लुप्तप्रायोऽधुना हन्त ! सोऽयमारधनाक्रमः ॥ १४० ॥

मारणोच्चाटमोहान्तर्धीवशीकरणादयः ।
नानाभिचारसंस्कारप्रयोगप्रथिताः क्रियाः ॥ १४१ ॥

मन्त्राणां तन्त्रणोपाया अस्थ्यसृक्पिशितादिकाः ।
रजोमैरेयमुण्डान्त्रकबन्धकुणपादयः ॥ १४२ ॥

अनेकाकारसम्भोगप्रकारास्तन्त्रसाधने ।
भैरवीणामधश्चोर्ध्वं भैरवाणां च विभ्रमाः ॥ १४३ ॥

तत्रानासक्तियोगस्य प्राधान्यं कार्यकर्मणाम् ।
आसक्त्या तु प्रहन्यन्ते स्खलन्तोऽत्र प्रसाधकाः ॥ १४४ ॥

साधनायै प्रवृत्तानां ध्रुवं स्याद् दृढचित्तता ।
परं पक्वधियामेषोपदिष्टा तान्त्रिकी क्रिया ॥ १४५ ॥

क्लिन्नयोर्निष्क्रियास्तत्र स्विन्नशुक्रोत्थसाधनात् ।
अनासक्त्या प्रकुर्वाणो नैष्कर्म्यं साधकोऽश्नुते ।। ९४६ ।।

तत्कर्मारम्भमात्रेण तत्र तस्य निमित्तता ।
कार्यतायामनासङ्गः शिवसायुज्यकारकः ।। ९४७ ।।

किञ्चनापि स्खलंस्तत्र तत्कर्माक्रान्तमानसः ।
ध्वंसमासादयेदन्तर्मनोवृत्तिप्रकम्पनात् ।। ९४८ ।।

शाक्ताश्शैवाश्च तादृक्षास्तान्त्रिकाश्चाद्य के नु ते ? ।
निर्दिष्टादध्वनो भ्रष्टा भूयांसस्तदुपासकाः ।। ९४९ ।।

भ्रष्टाचारेण तूच्छिन्नप्राया साधनपद्धतिः ।
वैषम्यं हेतुरज्ञानात् साधना तु श्रुतोचिता ।। ९५० ।।

सम्यञ्चस्साधका ये वा केऽप्यासन् सन्ति वा न वा ।
साम्यं तत्त्वं शिवं सत्यं प्रेक्षाञ्चक्रुस्तदात्मनि ।। ९५१ ।।

श्रौततन्त्रागमस्मार्तपुराणोपनिषत्स्वपि ।
सेयं पारम्परी विद्या भुक्तिमुक्तिफलप्रदा ।। ९५२ ।।

मीमांसादर्शनविमर्शः

श्रौतवाक्यपरिष्कारप्रकारन्यायदर्शिनः ।
वाक्यतत्त्वविदश्चैते पदार्थान्न प्रचक्षिरे ॥ ९५३ ॥

मुख्यत्वेनाधिकुर्वन्तो व्याख्यानं वाक्यदर्शने ।
लौकिकानां पदार्थानां विविक्तिं ते न तेनिरे ॥ ९५४ ॥

पूजितोऽभ्यर्चितस्सम्यग् विचारो यः श्रुतोदितः ।
मीमांसाशास्त्रमित्येतद् वेदवाक्यार्थनिर्णयात् ॥ ९५५ ॥

तात्पर्येण परिक्लिष्टं स्फुटमन्यादृशं किल ।
भासमानं श्रुतेर्वाक्यं तन्न्यायास्संविवृण्वते ॥ ९५६ ॥

विधीनां विशदार्थानां तात्पर्येण बलाबले ।
ससन्दर्भं विवृण्वानं मीमांसाशास्त्रमुत्तमम् ॥ ९५७ ॥

जैमिनीयमिदं शास्त्रं संश्लिष्टं सुव्यवस्थितम् ।
कर्मतन्त्रमनुच्छिन्नं धर्मार्थमुपयुज्यते ॥ ९५८ ॥

लौकिकालौकिकप्रायसमारम्भप्रवर्तकम् ।
कर्मणोऽकर्मणश्चात्र भावनातो विनिश्चयः ॥ ९५९ ॥

भाव्यमानतया तत्र कर्म भावनया स्मृतम् ।
यज्ञाद्युत्कृष्टमाख्यातं तत्फलं स्वर्गकामधुक् ॥ ९६० ॥

स्वर्गीयं चाक्षयं सर्वं मर्त्यं तूत्तरनाशवत् ।
कल्प्यमानमिदं कर्म धर्मशर्मनिदर्शकम् ॥ ९६१ ॥

प्रत्येकं लौकिकं वास्तु तथा तत्पारलौकिकम् ।
अक्षीणं स्वःपदं सम्यग् भावनान्तर्निबन्धनात् ॥ ९६२ ॥

कर्तृकर्मानुविद्धत्वात्फलं तत्र नरोऽश्नुते ।
तत्क्रियालक्षणोद्भूतममृतत्वाय कल्पते ॥ ९६३ ॥

वस्तुतत्त्वप्रसक्त्यैव प्रातिनिध्येन कर्मणः।
कर्तुरप्युन्नतं धाम दीप्यमानं विजृम्भते॥ ९६४॥

भावनातो विधातव्ये यज्ञादौ कर्मणीप्सिते।
सामग्रीणां समारम्भात्सामग्र्येण फलार्थिता॥ ९६५॥

कर्तृकर्मक्रियोद्दिष्टं फलं चैतद् विधिक्रमात्।
सर्वमन्ते त्वभेदेन तत्त्वाकारेण तिष्ठति॥ ९६६॥

कर्मणाऽप्यनुविद्धं तन्नैष्कर्म्येण प्रसिद्ध्यति।
को नु तत्त्वं परं प्राप्य ततोऽन्यल्लब्धुमिच्छति॥ ९६७॥

नामभिन्नं भवेत्कामं विश्रान्तेः परमावधौ।
यदेव प्रविभासेत तदेकममृतोपमम्॥ ९६८॥

सदेकं सर्वभावेन श्रुतौ सर्वत्र विष्ठितम्।
कर्मदृष्ट्या विनिर्वर्ण्यं, तदेकान्तप्रकाशकम्॥ ९६९॥

कर्मारम्भेण नैष्कर्म्यं, नैष्कर्म्यात्तदवस्थितिः।
तदपायात्परा वृत्तिर्वृत्तिक्षीणे तदात्मता॥ ९७०॥

सर्वशास्त्रेष्वनुद्भिन्नः प्रक्रमोऽयं विवर्तते।
वैशिष्ट्यं केवलं तत्र स्वप्रकारप्रवृत्तिमत्॥ ९७१॥

वाक्यार्थो वा पदार्थो वा न स्वार्थाय प्रकल्पते।
परार्थे चिन्त्यमाने तु परं तत्त्वं प्रमीयते॥ ९७२॥

मूर्तं कर्मापि तत्पूर्त्या जहत्स्वार्थं शुभाशुभम्।
अमूर्तं पर्यवस्यत्तत्परार्थे प्रविलीयते॥ ९७३॥

वाक्यार्थः खण्डशः क्लृप्तः पदार्थान्नो पृथङ्मतः।
पदार्थोऽखण्डभावेन वाक्यार्थीभूय भासते॥ ९७४॥

उभयोरुभयापेक्षा तत्तदर्थे विशिष्यते।
पूर्णे त्वस्मिन् द्वयोरेव व्युदासः प्रतितिष्ठति॥ ९७५॥

पदे वाक्ये महावाक्ये यदेवात्यन्तिकं महः।
तदेवानन्तभावेन प्रकाशात्मकमिष्यते॥ ९७६॥

सान्तं कर्मादिकं सर्वं सातिशय्येन सुस्थिरम् ।
निष्फलं सफलं वाऽपि तदर्थं संविधीयते ॥१७७॥

प्रतिकर्मार्जितं पुण्यं भुज्यमानमशेषतः ।
अन्ततः क्षीणतां याति भूयो भूयोऽत्र विच्युतिः ॥ १७८ ॥

कर्महानादकर्म स्यात्ततश्चावृत्तिरात्मनः ।
तन्निरोधेन निर्वृत्तिस्तया चावस्थितिर्ध्रुवा ॥ १७९ ॥

आरम्भोपायनैष्फल्ये तत्साफल्येऽपि सर्वतः ।
सान्तं सापेक्षिकं निघ्नं कर्मणः फलमिष्यते ॥ १८० ॥

स्वावस्थादर्शनं यावत्कर्मकाण्डप्रवर्तनम् ।
श्रुत्यादिष्वन्ततस्स्वात्मप्रकाशार्थं प्रकीर्तितम् ॥ १८१ ॥

तत्राचारविचाराभ्यां विधानं श्रेयसां पदम् ।
विनिर्दिष्टमिति प्रोक्तं मीमांसादर्शनोचितम् ॥ १८२ ॥

अव्ययं चानिवर्त्यं च परं धामाक्षयं फलम् ।
स्वर्गाख्यं भावितं चेतिकर्तव्यत्वेन देहिनाम् ॥ १८३ ॥

मन्त्राणां तद्विधीनां च देवतानामपि क्रियाः ।
यज्ञधर्मतयोद्दिष्टा भाव्यमानाः पृथक् पृथक् ॥ १८४ ॥

श्रौतमार्गेण लोकोऽयं शासितो लौकिकं खलु ।
कर्म कर्तुं प्रवर्तेत स्वर्गकामो महीयताम् ॥ १८५ ॥

विश्रब्धं प्रश्रयप्राप्तं स्वर्गीयं प्राप्य सत्फलम् ।
जगदभ्युन्नतं भायादित्येतच्छास्त्रकांक्षितम् ॥ १८६ ॥

कर्मणो विच्युतिर्लोके जीववैफल्यविक्रिया ।
यावत्सामर्थ्यमारम्भोपायस्याश्रयणं वरम् ॥ १८७ ॥

कर्माकर्मप्रचारेण नात्मानमवसादयेत् ।
कार्यमेवेत्यनासक्त्या सुधीःकर्तव्यमाचरेत् ॥ १८८ ॥

साकाँक्षं कर्म हातव्यं निराकाँक्षं समाश्रयेत् ।
पूर्वस्मात् कर्मबन्धस्स्यात्परस्मात्तन्निवर्तनम् ॥ १८९ ॥

कर्मत्वेनाभिमन्तव्यं श्रोतव्यं चापि यत्नतः।
निध्यातव्यमशेषेणोदासितव्यं फलाशने ॥ ९९० ॥

इत्थमाचरितं यद् यद् यज्ञीयं तत्तदुत्तमम्।
कर्म शास्त्रीयमाख्यातं सर्वश्रेयस्करं स्मृतम् ॥ ९९१ ॥

तदर्थं सर्वशास्त्राणि प्रवर्तन्ते निरापदम्।
तत्रैकान्तेन मीमांसाशास्त्रं प्रधान्यमञ्चति ॥ ९९२ ॥

भावनीयं समुद्दिष्टं तथाऽदृष्टनिबन्धनम्।
इष्टया संश्लिष्टमुत्कृष्टं कर्म स्यात्स्वःपदास्पदम् ॥ ९९३ ॥

तत्राप्यन्तरुदासीनो निष्कृत्या चेष्टते यदि।
तदैतद्धानसन्धानान्नैष्कर्म्यं पुरुषोऽश्नुते ॥ ९९४ ॥

पूर्णत्वेनात्मसात्कृत्य निध्यायाध्यात्मचेतसा।
कर्तृत्वे विष्ठितं सत्त्वात्कर्मत्वेऽकर्म भाव्यते ॥ ९९५ ॥

तत्त्वतः कर्मणाऽकर्मोपलब्धिस्तत्फलश्रुतिः।
वस्तुमात्रस्थितेस्सम्यङ्निवृत्तिः परिकीर्त्यते ॥ ९९६ ॥

यत्र यत्रानुसंश्लिष्टं मनो रत्याऽभिरज्यति।
ततस्ततः प्रकृष्यैतत्तदर्थमचलं क्रियात् ॥ ९९७ ॥

ध्रुवीकारक्रियाद्वारा तदाराद् विनिवर्तते।
आत्मना योगमासाद्य नैष्कर्म्याय प्रकल्पते ॥ ९९८ ॥

व्यवसायात्मिका सा धीस्साहाय्यं तत्र गच्छति।
यावत्तन्निष्ठताकालं तदन्ते प्रविलीयते ॥ ९९९ ॥

अहङ्कारानुवृत्तिश्च तद्द्वयस्योपकारिणी।
उपकृत्य क्षयं याति तत्र तन्मात्रविष्ठिते ॥ १००० ॥

सर्ववेदान्तवाक्यानां सिद्धान्तेषु प्रतिष्ठिता।
मीमांसा कर्मशास्त्रीयं मार्गमाश्रित्य तिष्ठति ॥ १००१॥

साम्येन प्राणिमात्रस्य पूर्णकल्याणकारकम् ।
धर्मकर्मोद्धरं शास्त्रं जैमिनीयमनुत्तमम् ॥ १००२ ॥

वाक्यार्थीभावमालम्ब्य शास्त्रमेतत् प्रवर्तते ।
समवायोऽत्र नैवेष्टस्तत्प्रकारो न युज्यते ॥ १००३ ॥

समवैतीति सम्बन्धो यश्चायं योगतस्स्मृतः ।
भाव्यमानार्थरूपत्वात्तद्विधौ पर्यवस्यति ॥ १००४ ॥

नामरूपान्तरे कश्चित्सम्बन्धस्स्यात्प्रतिष्ठितः ।
तेन तत्त्वार्थबोधेऽस्मिन् विकारो नोपजायते ॥ १००५ ॥

पदार्थेष्वनुरोधोऽत्र प्रक्रान्तो नाश्रितो यतः ।
ततो वैशेषिकोन्नीतो मार्ग एव प्रकल्पितः ॥ १००६ ॥

निषिद्धं तन्मतं नात्र पदार्थे किञ्चिदेषणात् ।
विशेषन्यायसन्धानं कर्मवैशिष्टचमिष्यते ॥ १००७ ॥

निषेधो वा विधानं वा धर्मरूपेण युज्यते ।
उपेयोपायभूतेषु प्रसिद्धि तद्द्वयं गतम् ॥ १००८ ॥

नेति नेति श्रुतिन्यायो निषिध्यैव प्रवर्तते ।
तत्त्वमस्यादिवाक्येषु तद्विधानमपि श्रुतम् ॥ १००९ ॥

शास्त्राणां सेयमेवास्ति तत्त्वदृष्ट्या प्रवर्तना ।
संशयो नोदयेदत्र यतस्सर्वं समञ्जसम् ॥ १०१० ॥

समत्वं संविचित्यैव गुह्यमुद्घाटितं भवेत् ।
तच्च सर्वत्र संश्लिष्टं द्वैतमद्वैतमस्तु वा ॥ १०११ ॥

सर्वं साध्वेव शास्त्रेषु व्यक्तिबुद्धावसाधुता ।
समष्टित्वेन नान्तर्यं कस्य केन विरोधिता ? ॥ १०१२ ॥

क्वचित्केनापि वादेन तत्त्वमेवाधिगम्यते ।
नामरूपादिषु श्लिष्टं बुधाः पश्यन्ति तत्परम् ॥ १०१३ ॥

वाचामाचार्यतामाप्य तदाचार्या वितेनिरे ।
सामञ्जस्येन सर्वेषां मतमौचित्यमञ्चति ॥ १०१४ ॥

नास्तिका वाऽऽस्तिका वा स्युस्सारमूचुस्समेऽपि ते ।
सत्यसाक्षात्कृतौ तेषां यतो यत्नो दृढीकृतः ॥ १०१५ ॥

आद्यन्तं सत्यमन्वेष्टुं सर्वत्र समदर्शिनः ।
शिवं शाश्वतिकं भावं दर्शनेषु प्रतन्वते ॥ १०१६ ॥

इत्थं विमृश्य विशदीकृतमत्र सर्वं,
संक्षिप्य दर्शनकृतां मतमुत्तमं यत् ।
तत्सादरं मतिमतां हृदि राजमानं,
विष्वग् विकासमयतां महतां मुदेऽस्तु ॥ १०१७ ॥

॥ समाप्तश्चायं ग्रन्थः ॥